This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ७९ विषय पूजाविधी
नांव- हिरण्यकेशीय नित्यविधी
लेखक/लिपीकार .....
पृष्ठ...४३..
काळ ..... पूर्ण/अपूर्ण .....

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ हिरण्यकेशीयो नित्यविधिः।

मूल्यम् रु. १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ हिरण्यकेशीयो नित्यविधिः।

मूल्यम् रु. १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगविद्या उपासना, तंत्रमंत्र साधना, सिद्धिविषयक ग्रंथ

	रु.		रु.		रु.
सार्थ धर्मसिंधू	१५०	साधना ते साक्षात्कार	४५	रुद्राक्ष महात्म्य	१५
सार्थ निर्णयसिंधू	१५०	शिवलीलामृत	२१	देवी महात्म्य	१२
स्वयंपुरोहित	६०	श्रीगुरुचरित्र	४०	अष्टांगयोगसिद्धी	१५
ऋग्वेदी नित्यविधी	१५	संपूर्ण चातुर्मास	१२	हठयोग प्रदीपिका	१५
ऋग्वेदी षोडशसंस्कार	३६	नवनाथ भक्तिसार	२१	मंत्रसागर	४५
यजुर्वेदीय षोडशसंस्कार	३६	सार्थ दुर्गासप्तशती	२४	ईश्वरप्राप्तीचा मार्ग	१५
चंद्रकात (वेदान्त ज्ञानाचा मूखग्रंथ)	३००	नवनाथ पूजा तत्त्वविज्ञान	१२	नवग्रह स्तोत्रसंग्रह	५
सौंदर्यलहरी	६०	तिबेटी योगविद्या	२७	संकल्पसिद्धी	१५
शिवपुराण	३०	पातंजल योगविद्या	२४	हठयोगातील गुप्त रहस्य	१५
सार्थ मनुस्मृती	४५	नामसाधनेचे मानसशास्त्र	१२	नवनाथ तत्त्वज्ञान उपासना	३०
		समग्र दत्तदर्शन	२७	दत्तभक्तासाठी भजनावली	१२

मागवा :— **जोशी ब्रदर्स, अप्पा बळवंत चौक, पुणे २**
श्रीगजानन बुक डेपो, पुणे ३०. • मुंबई २८

१ ते १४ मुखी रुद्राक्ष, सिद्ध केलेली यंत्रे, रत्ने व इतर पूजेचे सर्व साहित्य

यंत्रे — जाड तांब्यावर उठवलेली, अनुष्ठानाने सिद्ध केलेली.

(१) श्रीधनदा यंत्र, (२) श्रीकार्यसिद्धी यंत्र, (३) श्रीनवनाथ यंत्र, (४) श्रीयशीकरण यंत्र, (५) श्रीशाबरी यंत्र, (६) श्रीयंत्र, (७) श्रीदत्त यंत्र, (८) श्रीगायत्री यंत्र, (९) श्रीरामरक्षा यंत्र, (१०) श्रीमहामृत्युंजय यंत्र, (११) श्रीमहादुर्गादेवी यंत्र, (१२) गोसावी पंथाचे ग्रहपीडा निवारण यंत्र, (१३) श्रीगणेश यंत्र, (१४) श्रीहनुमान यंत्र, (१५) श्रीशनी यंत्र, (१६) श्रीव्यंकटेश यंत्र, (१७) श्रीबगलामुखीदेवी यंत्र, (१८) श्रीशिव यंत्र, (१९) चित्तावर्षण ऊर्फ विद्युत्मानस यंत्र, (२०) श्रीचिंतामणी यंत्र, (२१) श्रीशिव पंचाक्षरी यंत्र (२२) साडेसाती निवारक यंत्र, (२३) भाग्योदय करणारे यंत्र, (२४) बाहेरची बाधा निवारक यंत्र, (२५) आजारपणावर मात करणारे यंत्र, (२६) गंडांतर निवारक यंत्र, (२७) वास्तुशांतीचे यंत्र.

रत्न — (१) माणिक, (२) मोती, (३) हिरा, (४) पाचू, (५) गोमेद, (६) लसण्या, (७) ओपल, (८) पोवळे, (९) पुष्कराज, (१०) नीलमणी, (११) अलेक्झांड्रा ही रत्ने अनुष्ठानाने सिद्ध करून मिळतात.

रुद्राक्ष — १ ते १४ मुखी रुद्राक्ष ऑर्डरप्रमाणे खरे व खात्रीचे आणून देऊ. याशिवाय श्रीलक्ष्मीमातेच्या कृपाप्राप्तीसाठी एकाक्ष नारळ, गौरीशंकर, श्रीफळ, शाळीग्राम, कस्तुरी, अंबर, सफेद आकडयाचा गणपती, शिवलिंग, नर्मदेश्वर, स्फटिक शिवलिंग, पांढरा शुभ्र चंदन, लाल चंदन, पूजेच्या वेळी वाजवायचा शंख, जानवी, शुद्ध रुद्राक्ष माळा, मोठी नवरत्न आंगठी, गोदहसिंगी, सफेद शुद्ध चंदन माळा, शुद्ध पवित्र तुळशीमाळा, कमळ गट्टा माळा, स्फटिक माळा, जपानी मुंगा माळा, काळा चंदन, राजमणी माळा बारीक, दत्ताच्या पादुका, पूजेकरता एकूण एक मांत्रिक–तांत्रिक पूजेच्या सर्व वस्तू–पूजेचे सर्व सामान अगदी खात्रीशीर, शुद्ध, पवित्र, अनुष्ठानाने सिद्ध केलेले आम्ही विकतो. बाहेरगावी पोस्टाने पाठवतो.

या सर्व वस्तूंचे किंमतीचे सूचिपत्र फक्त जिज्ञासू वाचकांनाच पाठवले जाते.

श्रीगजानन बुक डेपो

दादर, मुंबई २८. □ फोन नं. : ४२२७५८४ ☆ भरत नाट्यमंदिरासमोर, पुणे ३०. □ फोन नं. : ४४३३०४
जोशी ब्रदर्स, अप्पा बळवंत चौक, पुणे २.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ हिरण्यकेशीयनित्यविधेर्विषयानुक्रमणिका ॥

१. स्नानविधिः	१	७. देवपूजा	१४
२. विभूतिधारणम्	३	८. ब्रह्मयज्ञः	२५
३. प्रातःसंध्या	४	९. वैश्वदेवः	२७
४. मध्याह्नसंध्या	१०	१०. यज्ञोपवीतमन्त्रः	३०
५. सायंसंध्या	११	११. रुद्रः	३१
६. तृचाकल्पनमस्काराः	१२	१२. देवेमन्त्राः	३९

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ अथ स्नानविधिः ॥ नमामि गंगे तव पादपंकजं सुरासुरैर्वंदितदिव्यरूपम् ॥ भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥ १ ॥ दर्शनात्सर्वपापघ्नीं स्पर्शनान्मोक्षदायिनीम् ॥ स्नानेन मुक्तिदां पुण्यां भागीरथीं नमाम्यहम् ॥२॥ आचम्य । प्राणानायम्य । विष्णवे नमो विष्णवे नमो विष्णवे नमः ॥ ॐविष्णुर्विष्णुर्विष्णुः॥ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे भरतवर्षे भरतखंडे जंबुद्वीपे दंडकारण्ये देशे गोदावर्याः दक्षिणे तीरे कृष्णावेण्योरुत्तरे तीरे शालिवाहनशके बौद्धावतारे रामक्षेत्रे रामरामाश्रमे अस्मिन्वर्तमाने अमुकनामसंवत्सरे अमुकअयने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमुकस्थे वर्तमाने चंद्रे अमुकस्थे श्रीसूर्ये अमुकस्थे देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं कायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपापक्षयार्थं देहशुद्धिपूर्वकं सर्वब्रह्माधिकारार्थं च प्रातःस्नानमहं करिष्ये ॥ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः ॥ यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः ॥ यन्मेमनसावाचाकर्मणावा दुष्कृतंकृतम् ॥ तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः ॥ नमोग्नयेपृथुमतेनमइंद्रायनमोवरुणायनमोवारुण्यैनमोब्भ्यः ॥ यदपांक्रूरं यदमेध्यंयदशांतंतदपगच्छतात् ॥ अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात् ॥ तन्नोवरुणोराजापाणिनाह्यवमर्शतु ॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्बिषः ॥ नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकताम् ॥ यश्चाप्सु वरुणः सपुनात्वघमर्षणः ॥ तीक्ष्णदंष्ट्रमहाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ सागरस्वननिर्घोष दंडहस्तासुरांतक ॥ जगत्स्रष्टर्जगन्मर्दिन्नमामि त्वां सुरेश्वर ॥ इमं मन्त्रं समुच्चार्य तीर्थे स्नानं समाचरेत् ॥ अन्यथा तत्फलस्यार्धं तीर्थेशो हरति ध्रुवम् ॥ इति स्नानं कृत्वा ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमꣳसचतापरुष्णिया ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ अघमर्षणम् ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्रिरजायततःसमुद्रोअर्णवः । समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोसुवः ॥ १ ॥ ऋतंचसत्यं० इति त्रिरावृत्त्याऽघमर्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यात् ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरं गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्ते केशवानंत गृहाणार्घ्यं नमोऽस्तु ते ॥ १ ॥ एहि सूर्य सहस्त्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते ॥ २ ॥ ब्रह्मकमंडलुद्भूते गंगे त्रिपथगामिनि ॥ त्रैलोक्यवंदिते देवि गृहाणार्घ्यं नमोऽस्तु ते ॥ ३ ॥ तपनस्य सुते देवि यमुने च महानदि ॥ शुद्धानां शुद्धये देवि गृहाणार्घ्यं नमोऽस्तु ते ॥४॥ किरणा धूतपापा च पुण्यतोया सरस्वती ॥ गंगा च यमुना चैव गृहाणार्घ्यं नमोऽस्तु ते ॥ ५ ॥ पापोऽहं पापकर्माहं पापात्मा पापसंभवः ॥ त्राहि मां कृपया गंगे गृहाणार्घ्यं नमोऽस्तु ते ॥ ६ ॥ (पुनश्च स्नानं

कृत्वा) अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ॥ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं स्नानांगं देवर्षिपितृतर्पणं करिष्ये ॥ तान् देवांस्तर्पयामि ॥ ॐभूर्देवांस्तर्पयामि ॥ ॐभुवर्देवांस्तर्पयामि ॥ ॐसुवर्देवांस्तर्पयामि ॥ ॐभूर्भुवःसुवर्देवांस्तर्पयामि ॥ निवीती ॥ तान् ऋषींस्तर्पयामि ॥ ॐभूर्ऋषींस्तर्पयामि ॥ ॐभुवर्ऋषींस्तर्पयामि ॥ ॐसुवर्ऋषींस्तर्पयामि ॥ ॐभूर्भुवःसुवर्ऋषींस्तर्पयामि ॥ प्राचीनावीती ॥ तान् पितॄंस्तर्पयामि ॥ ॐभूःपितॄंस्तर्पयामि ॥ ॐभुवःपितॄंस्तर्पयामि ॥ ॐसुवःपितॄंस्तर्पयामि ॥ ॐभूर्भुवःसुवःपितॄंस्तर्पयामि ॥ अनेन तर्पणेन श्रीपरमेश्वरः प्रीयताम् ॥ यन्मया दूषितं तोयं शारीरमलसंभवात् ॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहम् ॥ ततो वस्त्रपरिधानं कुर्यात् ॥ इति स्नानविधिः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ विभूतिधारणाविधिः ॥

श्रीगणेशाय नमः ॥ (हस्ते भस्म जलं च गृहीत्वा) ॐ ईशानः सर्वविद्या नामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवोमेअस्तु सदाशिवोम् ॥ शिरसि ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नो रुद्रःप्रचोदयात् ॥ मुखे ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ हृदये ॥ ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमःकालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॥ गुह्ये ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ पादयोः ॥ अग्निरिति भस्म ॥ वायुरिति भस्म ॥ जलमिति भस्म ॥ स्थलमिति भस्म ॥ व्योमेति भस्म ॥

सर्वꣳहवाइदं भस्म ॥ ॐ मानस्तोकेतनयेमानआयुषिमानोगोषुमानो अश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते ॥ इति सर्वांगे भस्म विलिप्य ॥ आचम्य ॥ केशवादिप्राणायामं कुर्यात् ॥

॥ अथ प्रातःसंध्या ॥

श्रीगणेशाय नमः (प्राङ्मुख उदङ्मुखो वा कुशासने ऊर्णासने वोपविश्य । उत्तमा तारकोपेता मध्यमा लुप्ततारका ॥ अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता) ॥ ॐ केशवाय नमः ॥ नारायणाय नमः ॥ माधवाय नमः ॥ गोविंदाय नमः ॥ विष्णवे नमः ॥ मधुसूदनाय नमः ॥ त्रिविक्रमाय नमः ॥ वामनाय नमः ॥ श्रीधराय नमः ॥ हृषीकेशाय नमः ॥ पद्मनाभाय नमः ॥ दामोदराय नमः ॥ संकर्षणाय नमः ॥ वासुदेवाय नमः ॥ प्रद्युम्नाय नमः ॥ अनिरुद्धाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः ॥ पुरुषोत्तमाय नमः ॥ अधोक्षजाय नमः ॥ नारसिंहाय नमः ॥ अच्युताय नमः ॥ जनार्दनाय नमः ॥ उपेंद्राय नमः ॥ हरये नमः ॥ श्रीकृष्णाय नमः ॥ ॐभूः ॥ ॐभुवः ॥ ॐꣳसुवः ॥ ॐमहः ॥ ॐजनः ॥ ॐ तपः ॥ ॐꣳस॒त्यम् ॥ ॐ तत्स॑वि॒तुर्वरे॑ण्यं॒भर्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योनः॑प्रचो॒दया॑त् ॥ ॐमापो॒ज्योती॒रसो॒मृतं॒ब्रह्म॒भूर्भुवः॒सुव॒रोम् ॥ प्रातःसंध्या कुमारी रक्ता रक्तवर्णा रक्तवस्त्रा रक्तगन्धा रक्तमाल्यानुलेपना हंसवाहना ब्रह्मदैवत्या गार्हपत्याग्न्युपस्थाना ऋग्वेदसꣳहिता प्रथमा ब्रह्मसंध्या वेदवतीनाम्नी ॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्योपास्तिं करिष्ये ॥ आया॑तुवर॑दादे॒वीअ॒क्षरं॑ब्रह्म॒संमि॑तम् ॥ गायत्रींछंद॑सांमा॒ते॒दं ब्रह्म॑ जु॒षस्व॑मे ॥ यदह्ना॑त्कुरु॑तेपा॒पं॒तदह्ना॑त्प्रति॒मुच्य॑ते ॥ यद्रात्रिया॑त्कुरु॑

तेपा॒पं॒तद्रात्रिया॑त्प्रति॒मुच्य॑ते ॥ सर्व॑व॒र्णेम॑हादे॒वि॒सं॒ध्यावि॑द्येस॒रस्व॑ति ॥ अ॒जरे॑अम॑रेदे॒वि॒स॒र्वदे॑विन॒मोस्तु॑ते ॥ ॐओजो॑सि॒सहो॑सि॒बल॑मसि॒भ्राजो॑सिदे॒वानां॒धाम॒नामा॑सि॒विश्व॑मसिवि॒श्वायुः॒सर्व॑मसिस॒र्वायुरभिभूरोंगायत्रीमावा॑हया॒मि॒ सावित्रीमावा॑हया॒मि॒ सरस्वतीमावा॑हया॒मि॒ छंदर्षीनावा॑हया॒मि॒ श्रियमावा॑हया॒मि॒ ॥ ह्रियमावा॑हया॒मि॒ ॥ ॐआपो॒हिष्ठाम॑यो॒भुव॒स्तान॑ऊ॒र्जेद॑धातन ॥ म॒हेरणा॑य॒चक्ष॑से ॥ योवः॑शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हनः॑ ॥ उ॒श॒तीरि॑वमा॒तरः॑ ॥ तस्मा॒अरं॑गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ॥ आपो॑ज॒नय॑थाचनः ॥ आपो॒वाइ॒दꣳसर्वं॒विश्वा॑भू॒तान्याप॑ःप्रा॒णावाआप॑ःप॒शव॒आपो॑न्न॒मापोमृ॑त॒माप॑ःस॒म्राडापो॑वि॒राडाप॑ःस्व॒राडाप॒श्छंदा॒ꣳस्यापो॒ज्योती॒ꣳष्यापो॒यजू॒ꣳष्याप॑ःस॒त्यमाप॒ःसर्वा॑दे॒वता॒आपो॒भूर्भुवः॒ सुव॒राप॒ ओम् ॐसूर्यश्चमामन्युश्चमन्युपतयश्चमन्यु॑कृते॒भ्यः ॥ पापेभ्यो॑रक्षं॒तां ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्रात्रियापापमकार्षं ॥ मनसावाचाहस्ताभ्याम् ॥ पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सूर्येज्योतिषिजुहोमिस्वाहा ॥ ॐकेशवाय नमः० श्रीकृष्णाय नमः ॥ ॐभूः ॥ ॐभुवः० ॥ ॐतत्सवि० ॥ ॐमापोज्योतीरसोमृतंब्रह्मभूर्भुवः सुवरोम् ॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्निंयागर्भंदधिरेविरूपास्तान आपःशंस्योनाभवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानाम् ॥ मधुश्चुतःशुचयोयाःपावका

॥ ५ ॥

प्रतःसं.

स्तानआपःशंस्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशंस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशतत्वचंमे ॥ सर्वांरग्नीरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसुवर्जनः ॥ पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमादेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेणपुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूरनु ॥ यत्तेपवित्रमर्चिषि ॥ अग्नेवितंतमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु ॥ वयंस्यामपतयोरयीणाम् ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणेनेषिरोमयोभूः ॥ द्यावापृथिवीपयसापयोभिः ॥ ऋतावरीयज्ञियेमा
पुनीताम् ॥ बृहद्भिःसवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैःपु
नाहिमा ॥ येनदेवाअपुनत ॥ येनापोदिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥
इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥ ऋषिभिःसंभृतꣳरसम् ॥
सर्वꣳसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानीर्योअध्येति ॥
ऋषिभिःसंभृतꣳरसम् ॥ तस्मैसरस्वतीदुहे ॥ क्षीरꣳसर्पिर्मधूदकं ॥
पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ॥
ब्राह्मणेष्वमृतꣳहितम् ॥ पावमानीर्दिशंतुनः ॥ इमँलोकमथोअमुम् ॥
कामान्त्समर्धयंतुनः ॥ देवीर्देवैःसमाभृताः ॥ पावमानीःस्वस्त्ययनीः ॥
सुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितम् ॥
येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण ॥ पावमान्यः

पुनंतुमा ॥ प्राजापत्यंपवित्रम् ॥ शतोद्यामꣳहिरण्मयम् ॥ तेनब्रह्म
विदोवयम् ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥ सोमःस्वस्त्या
वरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा । जातवेदामोर्जयंत्या
पुनातु ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नस्नात्वीमलादिव ॥ पूतंपवित्रेणे
वाज्यम् ॥ आपःशुंधंतुमैनसः ॥ आचम्यप्राणानायम्य ॥ ॐ भूर्भुवःसुव
स्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ श्रीसू-
र्याय इदमर्घ्यं दत्तं न मम ॥ ॐ भूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेव
स्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ श्रीसूर्याय इदमर्घ्यं दत्तं न मम ॥
ॐ भूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोद
यात् ॥ श्रीसूर्याय इदमर्घ्यं दत्तं न मम ॥ असावादित्योब्रह्मेतिब्रह्मैवसन्ब्र
ह्माप्येतियएवंवेद ॥ केशवाय नमः० श्रीकृष्णाय नमः ॥ प्राणायामं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वा॥ अपक्रामंतु पिशाचा ये भूता भूमिपालकाः॥ भूतानामवरोधेन ब्रह्मकर्म समारभे॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छंदः, आसने विनियोगः॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥ अंगुष्ठाग्रे तु गोविंदं तर्जन्यां तु महीधरं॥ मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम्॥ कनिष्ठिक्यां न्यसेद्विष्णुं करमध्ये तु माधवम्॥ एवं च करविन्यासं सर्वपापप्रणाशनम्॥ ॐभूःपादाभ्यां नमः॥ ॐभुवःजानुभ्यां नमः॥ ॐ॒सुवः कटिभ्यां नमः॥ ॐमहःनाभ्यै नमः॥ ॐजनःहृदयाय नमः॥ ॐतपः कंठाय नमः॥ ॐ॒सत्यं ललांटाय नमः॥ ॐपरब्रह्म शिरसे स्वाहा॥ ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः॥ ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा॥ ॐ भर्गोदेवस्य रुद्रात्मने शिखायै वषट्॥ ॐ धीमहि परमात्मने कवचाय हुं॥ ॐ धियोयोनो ज्ञानात्मने नेत्रत्रयायवौषट्॥ ॐ प्रचोदयात्सत्यात्मने अस्त्राय फट्॥ इति दिग्बंधः॥ गायत्र्या गायत्रीच्छंदो विश्वामित्रऋषिः, सविता देवताग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदय॰रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्वि॰शत्यक्षरा त्रिपदाषट्कुक्षिः पंचशीर्षोपनयने विनियोगः ॐभूः ॐभुवः ॐ॒सुवः ॐमहः ॐजनः ॐ तपः ॐ॒सत्यम्॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनः प्रचोदयात्॥ ॐमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम्॥ प्रातःसंध्यांगत्वेनाष्टोत्तरशतमष्टाविंशतिर्दशसंख्यं वा गायत्रीजपमहं करिष्ये॥ ॐभूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ इति गायत्रीं जप्त्वा॥ ॐतत्सवितुर्ब्रह्मात्मने हृदयाय नमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरेण्यं विष्ण्वात्मने शिरसे स्वाहा ॥ भर्गोदेवस्य रुद्रात्मने शिखायै वषट् ॥ धीमहि परमात्मने कवचाय हुम् ॥ धियोयोनो ज्ञानात्मने नेत्रत्रयाय वौषट् ॥ प्रचोदयात्सत्यात्मने अस्त्रायफट् ॥ इति दिग्विमोकः ॥ ॐमित्रस्यचर्षणीधृतश्रवोदेवस्यसानसिं ॥ सत्यंचित्रश्रवस्तमं ॥ मित्रोजनान्यातयतिप्रजानन्मित्रोदाधारपृथिवीमुतद्यां ॥ मित्रःकृष्टीरनिमिषाभिचष्टेसत्यायहव्यंघृतवद्विधेम ॥ प्रसमित्रमर्तोअस्तुप्रयस्वान्यस्तआदित्यशिक्षतिव्रतेन ॥ नहन्यतेनजीयतेत्वोतोनैनमꣳहोअश्नोत्यंतितोनदूरात् ॥ यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥ मिनीमसिद्यविद्यवि ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि ॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ॥ कितवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्नविद्म ॥ सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः ॥ याꣳ

सदासर्वभूतानिस्थावराणिचराणिंच ॥ सायंप्रातर्नमस्यंतिसामासंध्या अभिरक्षत्वोंनमः ॥ नमःप्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमोदाक्षिणायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमउदीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमऊर्ध्वायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमोधरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमो नमोवांतरायैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोगंगायमुनयवोर्मध्येयेवसंति ते मेप्रसन्नात्मानश्चिरंजीवितंवर्धयंतिनमोगंगायमुनयोर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः ॥ अवांतरदिशाभ्यो नमः ॥ सꣳस्रवंतुदिशोमायि समागच्छंतुसूनृताः ॥ सर्वेकामाअभियंतुनःॐप्रिया अभिस्रवंतुनः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐप्रियाअभिवादये ॥ अमुकप्रवरान्वितोऽमुकगोत्रोत्पन्नः यजुर्वेदस्य तैत्तिरीयशाखांतर्गतहिरण्यकेशीशाखाध्यायीःअमुकशर्माहं भोः अभिवादयामि ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च॥ जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञाताग च्छदेवियथासुखं ॥ स्तुतोमयावरदावेदमाताप्रचोदयं तीपवनेद्विजाता ॥ आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्वाप्रजातुंब्रह्म लोकं ॥ घृणिःसूर्यआदित्योनप्रभावात्यक्षरं ॥ मधुक्षरंतितद्रसं ॥ सत्यंवै तद्रसमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ श्रियै नमः ॥ संध्यायै नमः ॥ विद्यायै नमः। गुरुभ्यो नमः । वेदाय नमः। वेदपुरुषाय नमः॥ सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः । आकाशात्पतितं तोयं यथा गच्छति सागरम् ॥ सर्वदेवनमस्कारः केशवं

प्रति गच्छति ॥ ॐकेशवाय नम इत्यादिप्राणायामं कृत्वा ॥ अनेन प्रातःसंध्यानित्यकर्मणा भगवान् परमेश्वरः प्रीयताम् ॥ विष्णवे नमो विष्णवे नमो विष्णवे नमः ॥ इति प्रातःसंध्या समाप्ता ॥

॥ अथ मध्याह्नसंध्याप्रारंभः ॥

ॐ केशवाय नम इत्यादिप्राणायामं कृत्वा ॥ मध्याह्नसंध्या युवाना श्वेता श्वेतवर्णा श्वेतवस्त्रा श्वेतगंधा श्वेतमाल्यानुलेपना वृषभवाहना रुद्रदैवत्या दक्षिणाग्न्युपस्थाना यजुर्वेदसंहिता द्वितीया रुद्रसंध्या धर्मवतीनाम्नी मम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मध्याह्नसंध्योपास्तिं करिष्ये ॥ आयातुवरदादेवी० सर्वी देवताआपोभूर्भुवःसुवरापॐ ॥ आपःपुनंतुपृथिवींपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुश्चरितंमम ॥ सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा ॥ ॐकेशवाय नमः । नारायणाय नमः । माधवाय नमः० । दधिक्राव्णोअकारिषमित्यादि अर्घ्यदानांते प्राणायामांतं प्रातःसंध्यावत् ॥ ॐ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यम् ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च ॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतंजीवेमशरदःशतं नंदामशरदःशतंमोदामशरदःशतं भवामशरदःशतꣳशृणवामशरदःशतंप्रब्रवामशरदःशतमजीताःस्याम शरदःशतंज्योक्चसूर्यंदृशे ॥ यउदगान्महतोर्णवाद्विभ्राजमानःसरिरस्य मध्यासत्मावृषभोलोहिताक्षःसूर्योविपश्चिन्मनसापुनातु ॥ अवांतर

दिशाभ्यो नमः ॥ अपक्रामंतु पिशाचादिप्राणायामं कृत्वा ॥ मध्याह्नसंध्यांगं अष्टोत्तरशतं अष्टाविंशतिर्दशसंख्यं वा गायत्रीजपमहं करिष्ये ॥ गायत्रीजपं कृत्वा ॥ सꣳस्रवंतु दिशो मयि० ॥ अनेन मध्याह्नसंध्यानित्यकर्मणा भगवान्परमेश्वरः प्रीयताम् ॥ विष्णवे नमो विष्णवे नमः ॥ इति मध्याह्नसंध्या समाप्ता ॥ ॥

॥ अथ सायंसंध्याप्रारंभः ॥

ॐकेशवाय नमः इत्यादिप्राणायामं कृत्वा ॥ सायंसंध्या वृद्धा कृष्णा कृष्णवर्णा कृष्णवस्त्रा कृष्णगंधा कृष्णमाल्यानुलेपना गरुडवाहना विष्णुदैवत्या आहवनीयाम्युपस्थाना सामवेदसꣳहिता तृतीया विष्णुसंध्या सत्यवतीनाम्नी मम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायंसंध्योपास्तिं करिष्ये ॥ आयातुवरदादेवी० सर्वादेवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपोभूर्भुवःसुवरापॐ ॥ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंतां ॥ यदह्नापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्या मुदरेणशिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाम मृतयोनौ ॥ सत्येज्योतिषिजुहोमिस्वाहा ॥ ॐ केशवाय नमः ॥ नारायणाय० ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नस्नात्वीमलादिव ॥ पूतंपवित्रेणेवाज्यं ॥ आपःशुंधंतुमैनसः ॥ ॐभूर्भुवःसुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्य धीमहि ॥ धियोयोनःप्रचोदयात् ॥ ॐश्रीवरुणाय इदमर्घ्यं दत्तं नमम ॥ एवं त्रिरर्घ्यं दत्त्वा ॥ असावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियएवंवेद ॥ ॐकेशवाय नमः इत्यादिप्राणायामं कृत्वा ॥ अपक्रामंतु० ॐमापोज्योती रसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ सायंसंध्यांगमष्टोत्तरशतमष्टाविंशतिर्दशसंख्यं वा गायत्रीजपमहं करिष्ये ॥ गायत्रीजपं कृत्वा ॥ ॐइमंमेवरुण

श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ॐतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमान आयुःप्रमोषीः ॥ ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ सत्वन्नो अग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोववरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधि ॥ ॐयच्चिद्धितेविशोयथाप्रदेववरुण व्रतं ॥ मिनीमसिद्यविद्यवि ॥ सायंप्रातर्नमस्यंतिसामासंध्यांअभिरक्षत्वों नमः ॥ नमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनम उदीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमःप्राच्यैदिशे याश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षिणायैदिशेयाश्चदेवता एतस्यांप्रतिवसंत्येताभ्यश्चनमोनमः ऊर्ध्वायैदिशेयाश्चदेवता० ॥ आयुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्त्वाप्रजातुंब्रह्मलोकं ॥ श्रियै नमः ॥ संध्यायै नमः ॥ विद्यायै नमः ॥ अनेन सायंसंध्याख्येन कर्मणा भगवान्परमेश्वरः प्रीयताम् ॥ विष्णवे नमो विष्णवे नमो विष्णवे नमः ॥

॥ अथ तृचाकल्पनमस्कारप्रारंभः ॥

श्रीगणेशाय नमः ॥ आचम्य प्राणायामं कृत्वा अद्येत्यादि० श्रीसवितृसूर्यनारायणप्रीत्यर्थं तृचाकल्पेन विधिना नमस्काराख्यं कर्म करिष्ये ॥ अथ ध्यानम् ॥ ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥ ॐ ह्रां उद्यन्नद्यमित्रमहः ह्रां ॐ मित्राय नमः ॥१॥ ॐ ह्रीं आरोहन्नुत्तरां दिवं ह्रींॐ रवये नमः ॥ २ ॥ ॐ ह्रूं हृद्रोगं ममसूर्य ह्रूं ॐ सूर्याय० ॥ ३ ॥ ॐ ह्रैं हरिमाणंचनाशय ह्रैं ॐ भानवे० ॥ ४ ॥ ॐ ह्रौं शुकेषुमेहरिमाणं ह्रौं ॐ खगाय० ॥ ५ ॥ ॐ ह्रः रोपणाकांसुदध्मसि ह्रः ॐ पूष्णे न० ॥ ६ ॥ ॐ ह्रां अथोहारिद्रवेषुमे ह्रां ॐ हिरण्यगर्भाय० ॥ ७ ॥ ॐ ह्रीं हरिमाणंनिदध्मसि ह्रीं ॐ मरीचये० ॥ ८ ॥ ॐ ह्रूं उदगादयमादित्यः ह्रूं ॐ आदित्याय० ॥ ९ ॥ ॐ ह्रैं विश्वेनसहसासह ह्रैं ॐ सवित्रे न० ॥ १० ॥ ॐ ह्रौं द्विषंतंममरंधयन् ह्रौं ॐ अर्काय० ॥ ११ ॥ ॐ ह्रः मोअहं द्विषतोरधं ह्रः ॐ भास्कराय० ॥ १२ ॥ ॐ ह्रां ह्रीं उद्यन्नद्यमित्रमह आरोहन्नुत्तरांदिवं ह्रां ह्रीं ॐ मित्ररविभ्यां नमः ॥ ॐ ह्रूं ह्रैं हृद्रोगं ममसूर्यहरिमाणंचनाशय ह्रूं ह्रैं ॐ सूर्यभानुभ्यां० ॥ ॐ ह्रौं ह्रः शुकेषुमेहरिमाणंरोपणाकांसुदध्मसि ह्रौं ह्रः ॐ खगपूषभ्यां० ॥ ॐ ह्रां ह्रीं अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि ह्रां ह्रीं ॐ हिरण्यगर्भ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरीचिभ्यां० ॥ ॐ ह्रूं ह्रैं उदगादयमादित्योविश्वेनसहसासह ह्रूं ह्रैं ॐ आदित्यसवितृभ्यां न० ॥ ॐ ह्रौं ह्रः द्विषंतंममरंधयन्मोअहंद्विषतो रंधं ह्रौं ह्रः ॐ अर्कभास्कराभ्यां० ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्नद्य० दिवं० ॥ ह्रद्रो० नाशय ॥ ह्रां ह्रीं ह्रूं ह्रैं ॐ मित्रविसूर्यभानुभ्यो० ॥ ॐ ह्रौं ह्रः ह्रां ह्रीं शुकें० सुदध्मसि ॥ अथोहा० निदंध्मसि ॥ ह्रौं ह्रः ह्रां ह्रीं ॐ खगपूषहिरण्यगर्भमरीचिभ्यो न० ॥ ॐ ह्रूं ह्रैं ह्रौं ह्रः उदगा० सह ॥ द्विषंतं० रंधं ॥ ह्रूं ह्रैं ह्रौं ह्रः ॐ आदित्यसवित्रर्क-भास्करेभ्यो न० ॥ ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः ह्रांह्रींह्रूंह्रैंह्रौंह्रः ॐ उद्यन्न० द्विषं-तंममरंधयन्मोअहंद्विषतोरंधं ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्री ह्रूं ह्रैं ह्रौं ह्रः ॐ मित्रविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्क-रेभ्यो नमो नमः ॥ इति त्रिः ॥ इति तृचाकल्पनमस्काराः समाप्ताः ॥

तृचाक. ॥ १३ ॥

॥ अथ देवपूजाप्रारंभः ॥

श्रीगणेशाय नमः ॥ ॐकेशवादिप्राणायामं कृत्वा ॥ श्रीमन्महागणा-धिपतये नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्राम-देवताभ्यो नमः ॥ वास्तुदेवताभ्यो नमः ॥ शचीपुरंदराभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ मातापितृभ्यां नमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ॥ अविघ्नमस्तु ॥ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्र-केतुर्गणाध्यक्षो भालचंद्रो गजाननः ॥ द्वादशैतानि नामानि यः पठे-च्छृणुयादपि ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥ येषां हृदिस्थो भगवान्मंगलायतनं हरिः ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ॥ सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे भरतवर्षे भरतखंडे

कलियुगे कलिप्रथमचरणे जंबुद्वीपे दंडकारण्ये देशे गोदावर्याः दक्षिणे तीरे कृष्णावेण्योरुत्तरे तीरे बौद्धावतारे रामक्षेत्रे रामरामाश्रमे शालिवाहनशके अस्मिन्वर्तमाने अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अद्य वासरः वासरस्तु अमुकवासरे, अद्य दिवसनक्षत्रं अमुकदिवसनक्षत्रे, अमुकस्थे वर्तमाने चंद्रे, अमुकस्थे श्रीसूर्ये, अमुकस्थे देवगुरौ, शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीमहाविष्णुप्रमुखपंचायतनदेवताप्रीत्यर्थं यथामीलितोपचारद्रव्यैः पूजनमहं करिष्ये ॥ तदंगभूतं कलशपूजनं शंखपूजनं घंटापूजनं पुरुषसूक्तषडंगन्यासं च करिष्ये ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः, कूर्मो देवता, सुतलं छंदः,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ॥ तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषामवरोधेन पूजाकर्म समारभे ॥ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ ॐ यत्पुरुषंव्यदधुः ॥ कतिधाव्यं कल्पयन् ॥ मुखंकिमस्यकौबाहू ॥ कावूरूपादाउच्येते ॥ हृदयाय नमः ॥ ॐ ब्राह्मणोस्यमुखमासीत् ॥ बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यः ॥ पद्भ्या ऽशूद्रोअजायत ॥ शिरसे स्वाहा ॥ ॐ चंद्रमामनसोजातः ॥ चक्षोः सूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ शिखायै वषट् ॥ ॐ नाभ्याआसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमि

॥ १५ ॥

र्दिशःश्रोत्रात् ॥ तथालोका ऽअकल्पयन् ॥ कवचायहुं ॥ ॐ सप्तास्यास न्परिधयः ॥ त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरुषंपशुं ॥ नेत्रत्रयाय वौषट् ॥ ॐ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिधर्माणप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंते ॥ यत्रपूर्वेसाध्याःसंतिदेवाः ॥ अस्त्राय फट् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्रिसावित्री शांतिपुष्टिकरी तथा ॥ आयांतु देवपूजार्थं दुरितक्षयकारकाः ॥ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरी जलेऽस्मिन्संनिधिं कुरु ॥ ॐ भूर्भुवः-सुवः कलशाय नमः ॥ सकलपूजार्थे गंधाक्षतपुष्पं समर्पयामि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनुमुद्रां प्रदर्श्य ॥ शंखादौ चंद्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेंद्र तस्माच्छंखं प्रपूजयेत् ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ अग्रतः सर्वदेवानां पांचजन्य नमोऽस्तु ते ॥ पाञ्चजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः शंखः प्रचोदयात् ॥ शंखदेवताभ्यो नमः ॥ समस्तोपचारार्थे गंधपुष्पं समर्पयामि ॥ शंखमुद्रां प्रदर्श्य ॥ आगमार्थं तु देवानां गमनार्थं तु रक्षसां ॥ कुर्वे घंटारवं तत्र देवताह्वानलांछनं ॥ घंटायै नमः सकलपूजार्थे गंधाक्षतपुष्पं समर्पयामि ॥ घंटामुद्रां प्रदर्श्य ॥ घंटानादं कुर्यात् ॥ भो दीप भूताधारस्त्वं ज्योतिषां पतिरव्ययः ॥ यावत्पूजासमाप्तिः स्यात्तावत्त्वं सुस्थिरो भव ॥ दीपदेवतायै नमः सर्वो० गंधा० ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ शंखोदकेन पूजाद्रव्याणि संप्रोक्ष्य आत्मानं च प्रोक्षेत् ॥ अथ ध्यानम् ॥ शांताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ॥ लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ १ ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ २ ॥ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ३ ॥ ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान् किरीटी हारी हिरण्मयवपु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृतशंखचक्रः ॥ ४ ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ५ ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमो नमः ॥ ध्यायामि ॥ ॐ सहस्रशीर्षापुरुषः ॥ सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वा ॥ अत्यतिष्ठद्दशांगुलं ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ आवाहनार्थे पुष्पांजलिं समर्पयामि ॥ ॐ पुरुषएवेदꣳसर्वं ॥ यद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानः ॥ यदन्नेनातिरोहति ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ आसनार्थे अक्षतान् समर्पयामि ॥ ॐ एतावानस्यमहिमा ॥ अतोज्यायाꣳश्चपूरुषः ॥ पादोस्यविश्वाभूतानि ॥ त्रिपादस्यामृतंदिवि ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ पाद्यं समर्पयामि ॥ ॐ त्रिपादूर्ध्वउदैत्पुरुषः ॥ पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत् ॥ साशनानशने

अभि ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ अर्घ्यं समर्पयामि ॥ ॐ तस्माद्विराडजायत ॥ विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यत ॥ पश्चाद्भूमिमथोपुरः ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ आचमनीयं समर्पयामि ॥ ॐ यत्पुरुषेणहविषा ॥ देवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं ॥ ग्रीष्मइध्मःशरद्धविः ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ स्नानं समर्पयामि ॥ स्नानांतरेण आचमनीयं समर्पयामि ॥ ॐ सप्तास्यासन्परिधयः ॥ त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरुषंपशुं ॥ श्रीमहाविष्णु० नमः ॥ मधुपर्कंनिवेदयामि ॥ दधि घृतं मधु मधुपर्कस्नानान्तरेण आचमनीयं समर्पयामि ॥ अथ पंचामृतस्नानम् ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं ॥ भवावाजस्य संगथे ॥ श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्यो नमः ॥ पयःस्नानं सम-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्पयामि ॥ पयःस्नानांतरेण शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानांतरेण आचमनीयं समर्पयामि ॥ सकलपूजार्थे गंधाक्षतपुष्पं समर्प० ॥ ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रण आयूꣳषितारिषत् ॥ श्रीमहाविष्णु० दधिस्नानं समर्प० ॥ दधिस्नानांतरेण शुद्धोदकस्नानं० ॥ शुद्धोदक० आच० सकलपूजार्थे० ॥ ॐ घृतं मिमिक्षिरे घृतमस्ययोनिर्घृतेश्रितोघृतमुवस्यधाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं ॥ श्रीमहाविष्णु० ॥ घृतस्नानं समर्प० ॥ घृतस्नानांतरेण शुद्धोदकस्नानं सम० ॥ शुद्धोदक० सकलपू० ॥ ॐमधु वाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसिमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः ॥ श्रीमहाविष्णु० ॥ मधुस्नानं०

मधुस्नानांतरेण शुद्धोदक० ॥ सकल० ॥ ॐत्वेक्रतुमपिवृंजंतिविश्वेद्वियदेतेत्रिभवंत्यूमाः ॥ स्वादोःस्वादीयःस्वादुनास्रृजासमतऊषुमधुमधुनाभियोधि ॥ श्रीमहावि० ॥ शर्करास्नानं स० ॥ शर्करास्नानांतरेण शुद्धोदक० ॥ सकलपूजा० ॥ ॐगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳसर्वभूतानांतामिहोपह्वयेश्रियं ॥ श्रीमहा० ॥ षष्ठेन गंधोदकस्नानं सम० ॥ गंधोदकस्नानांतरेण शुद्धोदकस्ना० ॥ सकलपू० ॥ श्रीमहावि० ॥ विलेपनार्थे चंदनं सम० ॥ अलंकरणार्थे अक्षतान् सम० ॥ पूजार्थे पुष्पाणि तुलसीपत्राणि बिल्वपत्राणि दूर्वांकुरान् ऋतूद्भवानि पुष्पाणि च समर्प० ॥ श्रीमहा० ॥ धूपं स० ॥ श्रीमहा० ॥ दीपं स० ॥ श्रीमहा० ॥ नैवेद्यार्थे पंचामृतशेषनैवेद्यं स० ॥ (अथवा पयः शर्करां गुडं वा स०) ॥ ॐप्राणाय स्वाहा ॥ ॐ अपानाय स्वाहा ॥ ॐव्यानाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा ॥ ॐ उदानाय स्वाहा ॥ ॐ समानाय स्वाहा ॥ ॐ ब्रह्मणे स्वाहा ॥ नैवेद्यमध्ये पानीयं समर्प० (पुनः) ॐ प्राणाय स्वाहा० ॥ ब्रह्मणे स्वाहा ॥ श्रीमहा० ॥ हस्तप्रक्षालनं सम० ॥ मुखप्रक्षालनं स० ॥ करोद्वर्तनार्थे चंदनं स० ॥ मुखवासार्थे पूगीफलतांबूलं स० ॥ सुवर्णपुष्पदक्षिणां समर्पयामि ॥ प्रदक्षिणां सम० ॥ नमस्कारं सम० ॥ मंत्रपुष्पं समर्पयामि ॥ अनेन यथाज्ञानेन कृतपूर्वाराधनेन श्रीमहाविष्णुः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ उत्तरे निर्माल्यं विसर्जयेत् ॥ अथाभिषेकः ॥ ॐ सहस्रशीर्षापुरुषः ॥ सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतो वृत्वा ॥ अत्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदꣳसर्वं ॥ यद्भूतंयच्चभाव्यं ॥ उतामृतत्वस्येशानः ॥ यदन्नेनातिरोहति ॥ एतावानस्यमहिमा ॥ अतोज्यायाꣳश्चपूरुषः ॥ पादोस्यविश्वाभूतानि ॥ त्रिपादस्यामृतंदिवि ॥

त्रिपादूर्ध्वउदैत्पुरुषः ॥ पादोस्येहाभवात्पुनः ॥ ततोविष्वङ्व्यक्रामत् ॥ साशनानशनेअभि ॥ तस्माद्विराडजायत ॥ विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यत ॥ पश्चाद्भूमिमथोपुरः ॥ यत्पुरुषेणहविषा ॥ देवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं ॥ ग्रीष्मइध्मःशरद्धविः ॥ सप्तास्यासन्परिधयः ॥ त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरुषंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन् ॥ पुरुषंजातमग्रतः ॥ तेनदेवाअयजंत ॥ साध्या ऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ संभृतंपृषदाज्यं ॥ पशूꣳस्ताꣳश्चक्रे वायव्यान् ॥ आरण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ॥ ऋचःसामानिजज्ञिरे ॥ छंदाꣳसिजज्ञिरेतस्मात् ॥ यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंत ॥ येकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात् ॥ तस्माज्जाताअजावयः ॥ यत्पुरुषंव्यदधुः ॥ कतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहू ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कावूरूपादावुच्येते ॥ ब्राह्मणोस्यमुखमासीत् ॥ बाहूराजन्यःकृतः ॥ ऊरू तदस्ययद्वैश्यः ॥ पद्भ्या ँशूद्रोअजायत ॥ चंद्रमामनसोजातः ॥ चक्षोः सूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्याआसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात् ॥ तथा लोका ँअकल्पयन् ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णंतमसस्तु पारे ॥ सर्वाणिरूपाणिविचित्यधीरः ॥ नामानिकृत्वाभिवदन्यदास्ते ॥ धातापुरस्ताद्यमुदाजहार ॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंविद्वान मृतइहभवति ॥ नान्यःपंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंते ॥ यत्रपूर्वे साध्याःसंतिदेवाः ॥ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधामभिः ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपा ँसुरे ॥

त्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ विष्णोः कर्माणिपश्यतयतोव्रतानिपस्पशे ॥ इंद्रस्ययुज्यःसखा ॥ तद्विष्णोः परमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ तद्विप्रासोविपन्यवो जागृवा ँसःसमिंधते ॥ विष्णोर्यत्परमंपदं ॥ देवस्यत्वासवितुःप्रसवे श्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिं चामि ॥ बलायश्रियैयशसेन्नाद्याय ॥ ॐभूर्भुवःसुवः अमृताभिषेकोऽस्तु ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु ॥ हरों हरों हरों हरहरमहादेव ॥ श्रीमहावि० ॥ अभिषेकस्नानं समर्पयामि ॥ अभिषेकस्नानांते आचमनीयं सम० ॥ नर्यप्रजांमेगोपाय ॥ अमृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठिताम् ॥ सुप्रतिष्ठितमस्तु ॥ ॐ तंयज्ञंबर्हिषिप्रौक्षन् ॥ पुरुषंजातमग्रतः ॥ तेनदेवाअयजन्त ॥ साध्याऋषयश्चये ॥ श्रीमहा० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्त्रार्थे तुलसीपत्रं सम० ॥ ॐ तस्माद्यज्ञात्सर्वहुतः ॥ संभृतं० ॥ उपवस्त्रार्थे यज्ञोपवीतं सम० ॥ (अथवा तुलसीपत्रं स०) वस्त्रोपवस्त्रांते आचमनीयं सम० ॥ ॐतस्माद्यज्ञात्सर्वहुतः ॥ ऋचः सा० ॥ श्रीखंडं चंदनं दिव्यं गंधाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳसर्वं० ॥ श्रीमहा० विलेपनार्थे चंदनं सम० ॥ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ श्रीमहा० ॥ अलंकरणार्थे अक्षतान् सम० ॥ हरिद्रां कुंकुमं परिमलद्रव्यं च सम० ॥ तस्मादश्वा० ॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥ करवीरैर्जातिकुसुमैश्चंपकैर्बकुलैः शुभैः ॥ शतपत्रैश्च कल्हारैरर्चये परमेश्वर ॥ श्रीमहा० ॥ पूजार्थे कालोद्भव-

पुष्पाणि समर्पयामि ॥ श्रीमहा० ॥ केशवादिचतुर्विंशतिनामभिः तुलसीपत्राणि सम० ॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ॥ त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥ ॐयत्पुरुषंव्यदधुः ॥ कति० ॥ धूरसिधूर्वधूर्वतंधूर्वतंयोस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः ॥ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ श्रीम० धूपं स० ॥ ॐब्राह्मणोस्यमुखं० ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्य-तिमिरापह ॥ भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ॥ त्राहि मां निरयाद्घोराद्दीपोऽयं प्रतिगृह्यताम् ॥ उद्दीप्यस्वजातवेदोपघ्नंनिर्ऋतिं मम ॥ पशूꣳश्चमह्यमावहजीवनंचदिशोदिश ॥ श्रीम० ॥ दीपं स० ॥ ॐचंद्रमामनसोजातः ॥ चक्षोःसू० ॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुरु ॥ ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥ शर्कराखंडखाद्यानि दधिक्षीरघृतानि च ॥ आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥ श्रीमहा० ॥ नैवेद्यार्थे पयःशर्करानैवेद्यं सम० ॥ नैवेद्यात्पूर्वं आचमनीयं स० ॥ अमृतोपस्तरणमसि ॥ ॐ प्राणाय स्वाहा ॥ ॐ अपानाय स्वाहा ॥ ॐव्यानाय स्वाहा ॥ ॐउदानाय स्वाहा ॥ ॐसमानाय स्वाहा ॥ ॐ ब्रह्मणे स्वाहा ॥ नैवेद्यमध्ये पानीयं स० ॥ ॐ प्राणाय स्वाहा ॥ ॐ अपानाय० ॥ ब्रह्मणेस्वाहा ॥ उत्तरापोशनं सम० ॥ हस्तप्रक्षालनं स० ॥ मुखप्रक्षालनं स० ॥ करोद्वर्तनार्थे चंदनं स० ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यताम् ॥ ॐना भ्याआसी० ॥ श्रीम० तांबूलं स० ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्य वर्णतमसस्तुपारे ॥ सर्वाणिरूपाणिविचित्यधीरः ॥ नामानिकृत्वाभि

वदन्यदास्ते ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ श्रीम० सुवर्णपुष्पदक्षिणां स० ॥ धातापुरस्ताद्यमुदाजहार ॥ शक्रःप्रविद्वान्० ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ॥ तस्मात्फलप्रदानेन सफलाश्च मनोरथाः ॥ श्रीम० ॥ नारिकेलफलं स० (अथवा) कालोद्भवफलं स० ॥ श्रियेजातःश्रियआनिरियायश्रियंवयोजारितृभ्यो दधाति ॥ श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्यौ ॥ श्रियएवैनंतच्छ्रियमादधातिसंततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद ॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेंद्रहारम् ॥ सदा वसंतं हृदयारविंदे भवं भवानीसहितं नमामि ॥ (आरार्तिक्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यात्) ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्य-
भावेन रक्षस्व परमेश्वर ॥ श्रीम० ॥ नमस्कारान् सम० ॥ यानि कानि
च पापानि जन्मांतरकृतानि च ॥ तानि तानि विनश्यंति प्रदक्षिण-
पदे पदे ॥ श्रीम० ॥ प्रदक्षिणाः सम० ॥ यज्ञेनयज्ञमयजंत० ॥
ॐ राजाधिराजायप्रसह्यसाहिने ॥ नमोवयंवैश्रवणायकुर्महे ॥
समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥ कुबेराय
वैश्रवणाय ॥ महाराजायनमः ॥ ॐस्वस्ति ॥ साम्राज्यं भौज्यं स्वाराज्यं
वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समंतपर्यायी स्यात्
सार्वभौमः सार्वायुष आंतादापरार्धात् पृथिव्यै समुद्रपर्यंताया एकरा-
ळिति ॥ तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्
गृहे ॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ योवैतांब्रह्मणो

वेद ॥ अमृतेनावृतांपुरीं ॥ तस्मैब्रह्मचब्रह्माच ॥ आयुःकीर्तिंप्रजां
ददुः ॥ श्रीम० ॥ मंत्रपुष्पं स० ॥ नमस्करोमि ॥ गतं दुःखं गतं पापं
गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्योऽहं तव दर्शनात् ॥
आवाहनं न जानामि न जानामि तवार्चनम् ॥ पूजां चैव न जानामि
क्षम्यतां परमेश्वर ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ नमो देवेभ्यः ॥ अनेन
ध्यानावाहनादिषोडशोपचारैर्यथाज्ञानेन पूर्वाराधनेनोत्तराराधनेन च
श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥
कलशशंखघंटाधूपदीपस्थावरदीपदेवताभ्यो नमः ॥ विलेपनार्थं चंदनं
स० ॥ अलंकरणार्थे अक्षतान् सम० ॥ पूजार्थे पुष्पाणि स० ॥
धूपं स० ॥ दीपं स० ॥ कलशादिसमस्तदेवता० ॥ नैवेद्यार्थे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयःशर्करानैवेद्यं स० ॥ अमृतोपस्तरणमसि ॥ ॐ प्राणाय स्वाहा ॥ ॐ अपानाय० ॥ ॐ व्यानाय० ॥ ॐ उदानाय० ॥ ॐ समानाय० ॥ ॐ ब्रह्मणे स्वाहा ॥ नैवेद्यमध्ये पानीयं स० ॥ ॐ प्राणाय स्वाहा० ब्रह्मणे स्वाहा ॥ कलशादिसमस्तदे० ॥ मंत्रपुष्पं स० ॥ शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि ॥ अंगलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ १ ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ विष्णुपादोदकं तीर्थं जठरे धारयाम्यहम् ॥ २ ॥ बाणरावणचंडीशनंदीभृंगीरिटादयः ॥ सदाशिवप्रसादं च सर्वे गृह्णंतु शांभवाः ॥ ३ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ इति प्रार्थनां समर्पयामि ॥ अनेन यथाज्ञानेन कृतपूजनेन श्रीभगवान् परमेश्वरः प्रीयतां ॥ ॐ तत्सत् ॥ ॥ ॥

अथ ब्रह्मयज्ञतर्पणप्रारंभः ॥

श्रीगणेशाय नमः ॥ अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थम् श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञेन यक्ष्ये ॥ हस्तावव निर्ज्य ॥ त्रिराचामेत् ॥ द्विःपरिमृज्य ॥ सकृदुपस्पृश्य ॥ सव्यंपाणिंपादौप्रोक्षति ॥ शिरश्चक्षुषी नासिकेश्रोत्रेहृदयमालभ्य ॥ दक्षिणोत्तरौपाणीपादौकृत्वा ॥ सपवित्रावोमितिप्रतिपद्यते ॥ ॐ भूस्तत्सवितुर्वरेण्यं ॥ भुवोभर्गोदेवस्यधीमहि ॥ सुवर्धियोयोनःप्रचोदयात् ॥ १ ॥ ॐ भूर्भुवस्तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥ सुवर्धियोयोनःप्रचोदयात् ॥ २ ॥ ॐ भूर्भुवः सुवस्तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ ३ ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ १ ॥ इषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सवितात्प्रार्पयतुश्रेष्ठतमायकर्मणआ
प्यायध्वमघ्नियादेवभागमूर्जस्वतीः पयस्वतीःप्रजावतीरनमीवाअयक्ष्मा
मावस्तेनईशतमाघशंसोरुद्रस्यहेतिःपरिवोवृणक्तुध्रुवाअस्मिन्गोपतौ
स्यातबह्वीर्यजमानस्यपशून्पाहि ॥ २ ॥ ॐ अग्नआयाहिवीतयेगृणानो
हव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ ३ ॥ ॐ शंनोदेवीरभिष्टयआपो
भवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ ४ ॥ ॐ नमोब्रह्मणेनमोअस्त्वग्नये
नमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवे
बृहतेकरोमि ॥ इति त्रिवारं जप्त्वा ॥ ३ ॥ ॐ शांतिःशांतिःशांतिः ॥
अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥
तत्सद्ब्रह्मार्पणमस्तु ॥ श्रीपरमेश्वरप्रीत्यर्थं देवर्षिपितृतर्पणं करिष्ये ॥
ॐ ब्रह्माणं तर्पयामि ॥ प्रजापतिं तर्पयामि ॥ बृहस्पतिं त० ॥ अग्निं

त० ॥ वायुं त० ॥ सूर्यं० ॥ चंद्रमस० ॥ नक्षत्राणि० ॥ इंद्रंराजानं० ॥
यमंराजानं० ॥ वरुणंराजानं० ॥ सोमंराजानं० ॥ वैश्रवणं
राजानं० ॥ वसून्त० ॥ रुद्रांस्त० ॥ आदित्यांस्त० ॥ विश्वान्देवांस्त० ॥
साध्यांस्त० ॥ ऋभून्त० ॥ भृगून्त० ॥ मरुतस्त० ॥ अथर्वणस्त० ॥
अंगिरसस्त० ॥ अथ निवीती ॥ विश्वामित्रं त० ॥ जमदग्निं त० ॥ भर-
द्वाजं त० ॥ गौतमं त० ॥ अत्रिं त० ॥ वसिष्ठं त० ॥ कश्यपं त० ॥ अरुंधतीं
त० ॥ अगस्त्यं त० ॥ कृष्णद्वैपायनं त० ॥ जातूकर्ण्यं त० ॥ तरक्षुं त० ॥
तृणबिंदुं त० ॥ वर्मिणं० ॥ वरूथिनं० ॥ वाजिनं० ॥ वाजश्रवसं० ॥ सत्य-
श्रवसं० ॥ सुश्रवसं० ॥ सुतश्रवसं० ॥ सोमशुष्मायणं० ॥ सत्त्ववंतं० ॥
बृहदुक्थं० ॥ वामदेवं० ॥ वाजिरत्नं० ॥ हर्यश्वायनं० ॥ उदमयं० ॥ गोतमं० ॥
ऋणंजयं० ॥ ऋतंजयं० ॥ कृतंजयं० ॥ धनंजयं० ॥ बभ्रुं० ॥ त्र्यरुणं० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिवर्षं०॥ त्रिधातुं०॥ शिबिं त०॥ पराशरं०॥ विष्णुं०॥ रुद्रं०॥ स्कंदं०॥ काशीश्वरं०॥ ज्वरं०॥ धर्मं०॥ अर्थं०॥ कामं०॥ क्रोधं०॥ वसिष्ठं०॥ इंद्रं०॥ त्वष्टारं०॥ कर्तारं०॥ धर्तारं०॥ धातारं०॥ मृत्युं०॥ सवितारं०॥ सावित्रीं०॥ ऋग्वेदं०॥ यजुर्वेदं०॥ सामवेदं०॥ अथर्ववेदं०॥ इतिहास-पुराणांस्त०॥ प्राचीनावीती॥ वैशंपायनं०॥ पलिंगुं०॥ तित्तिरं०॥ उखं०॥ आत्रेयं पदकारं०॥ कौंडिण्यं वृत्तिकारं०॥ सूत्रकारं०॥ सत्याषाढं०॥ प्रवचनकर्तृंस्त०॥ आचार्यास्त०॥ ऋषींस्त०॥ वानप्रस्थांस्त०॥ ऊर्ध्व-रेतसस्त०॥ एकपत्नींस्त०॥ १४॥ यथाधिकारं पितॄंस्तर्पयेत्॥ तातांबा-त्रितयं सपत्नजननीमातामहादित्रयं सस्त्रि स्त्रीतनयादि तातजननीस्व-भ्रातरः सस्त्रियः॥ तातांबात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुः॥ शिष्यास्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥ आब्रह्मस्तंबपर्यंतं

देवर्षिपितृमानवाः॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीत-कुलकोटीनां सप्तद्वीपनिवासिनाम्॥ आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकम्॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते गृह्णंतु मया दत्तं सूत्रनिष्पीडनोदकम्॥ अनेन देवर्षिपितृतर्पणाख्येन कर्मणा भगवान् परमेश्वरः प्रीयतां न मम॥ तत्सद्ब्रह्मार्पणमस्तु॥

अथ सबलिहरणवैश्वदेवप्रारंभः॥

श्रीगणेशाय नमः॥ केशवादिचतुर्विंशतिनामभिराचम्य॥ प्राणा-यामं कृत्वा॥ अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं पंचसूनादोषपरिहारार्थं आत्मसंस्कारार्थं अन्न-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिवर्षं०॥ त्रिधातुं०॥ शिबिं त०॥ पराशरं०॥ विष्णुं०॥ रुद्रं०॥ स्कंदं०॥ काशीश्वरं०॥ ज्वरं०॥ धर्मं०॥ अर्थं०॥ कामं०॥ क्रोधं०॥ वसिष्ठं०॥ इंद्रं०॥ त्वष्टारं०॥ कर्तारं०॥ धर्तारं०॥ धातारं०॥ मृत्युं०॥ सवितारं०॥ सावित्रीं०॥ ऋग्वेदं०॥ यजुर्वेदं०॥ सामवेदं०॥ अथर्ववेदं०॥ इतिहास-पुराणांस्त०॥ प्राचीनावीती॥ वैशंपायनं०॥ पलिंगुं०॥ तित्तिरं०॥ उखं०॥ आत्रेयं पदकारं०॥ कौंडिण्यं वृत्तिकारं०॥ सूत्रकारं०॥ सत्याषाढं०॥ प्रवचनकर्तृंस्त०॥ आचार्यांस्त०॥ ऋषींस्त०॥ वानप्रस्थांस्त०॥ ऊर्ध्व-रेतसस्त०॥ एकपत्नींस्त०॥ १४॥ यथाधिकारं पितॄंस्तर्पयेत्॥ तातांबा-त्रितयं सपत्नजननीमातामहादित्रयं सस्त्रि स्त्रीतनयादि तातजननीस्व-भ्रातरः सस्त्रियः॥ तातांबात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुः॥ शिष्यास्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥ आब्रह्मस्तंबपर्यंतं

देवर्षिपितृमानवाः॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीत-कुलकोटीनां सप्तद्वीपनिवासिनाम्॥ आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकम्॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते गृह्णंतु मया दत्तं सूत्रनिष्पीडनोदकम्॥ अनेन देवर्षिपितृतर्पणाख्येन कर्मणा भगवान् परमेश्वरः प्रीयतां न मम॥ तत्सद्ब्रह्मार्पणमस्तु॥

अथ सबलिहरणवैश्वदेवप्रारंभः॥

श्रीगणेशाय नमः॥ केशवादिचतुर्विंशतिनामभिराचम्य॥ प्राणा-यामं कृत्वा॥ अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं पंचसूनादोषपरिहारार्थं आत्मसंस्कारार्थं अन्न-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्कारार्थं सिद्धान्नेन सायंप्रातर्वैश्वदेवौ तंत्रेण करिष्ये ॥ अग्निं प्रज्वाल्य ॥ रुक्मकनामानमग्निं प्रतिष्ठापयामि ॥ ॐ चत्वारि शृंगात्रयो अस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवो मर्त्याँआविवेश ॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ॥ बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥ तोमरं व्यजनं वामैर्घृतपात्रं च धारयन् ॥ मेषारूढो जटाबद्धो गौरवर्णो महौजसः ॥ धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः ॥ आत्माभिमुखमासीन एवंरूपो हुताशनः ॥ अग्ने वैश्वानर शांडिल्यगोत्र मेषध्वज प्राङ्मुख मम संमुखो वरदो भव ॥ यथाहुतद्धसवोगौर्यँचित्पदिषिताममुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचान्यँहुःप्रार्तार्यग्नेप्रतरांन्

वैश्वदेव.

॥ २७ ॥

आयुः ॥ परिस्तीर्य ॥ अदितेनुमन्यस्व ॥ अनुमतेनुमन्यस्व ॥ सरस्वतेनुमन्यस्व ॥ देवसवितुःप्रसुव ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यमर्त्योजोहवीमि॥ जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वँसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं ॥ अश्विनँसपुत्रिणं वीरवँतंगोमँतँरयिंनशतेस्वस्ति ॥ सिद्धमन्नमग्नावधिश्रित्य ॥ उद्गुद्वास्य ॥ प्रोक्ष्य ॥ अग्नेः पश्चात् आत्मनोऽग्रतो निधाय ॥ अभिघार्य ॥ ॐ अग्नयेस्वाहा ॥ अग्नय इदं न मम ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ विश्वेभ्यो देवेभ्य इदं न मम ॥ ध्रुवायभूमायस्वाहा ॥ ध्रुवाय भूमायेदं० ॥ ध्रुवक्षितयेस्वाहा ॥ ध्रुवक्षितय इदं० ॥ अच्युतक्षितयेस्वाहा ॥ अच्युतक्षितय इ० ॥ अग्नयेस्विष्टकृतेस्वाहा ॥ अग्नये स्विष्टकृत इदं० ॥ ॐ भूःस्वाहा ॥ अग्नय इदं० ॥ ॐ भुवःस्वाहा ॥ वायव इदं० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ सुवःस्वाहा ॥ सूर्यायेदं० ॥ ॐभूर्भुवःसुवःस्वाहा ॥ प्रजापतय इदं न मम ॥ यथाहुतद्वसवोगौर्यैचित्पदिषितामुंचतायजत्राः ॥ एवात्वमस्मत्प्रमुंचाव्यꣳहःप्रातार्यग्नेप्रतरान्नआयुः ॥ परिस्तरणान्युत्तरे विसृज्य ॥ अदितेन्वंमꣳस्थाः ॥ अनुमतेन्वंमꣳस्थाः ॥ सरस्वतेन्वंमꣳस्थाः ॥ देवसवितःप्रासावीः ॥ यज्ञनमस्तेयज्ञ ॥ नमोनमश्चतेयज्ञ ॥ शिवेनमे संतिष्ठस्व ॥ स्योनेनमेसंतिष्ठस्व ॥ सुभूतेनमेसंतिष्ठस्व ॥ ब्रह्मवर्चसेनमेसंतिष्ठस्व ॥ यज्ञस्यर्धिमनुसंतिष्ठस्व ॥ उपतेयज्ञनमः ॥ उपतेनमः ॥ उपतेनमः ॥ सर्वमंत्रेषु तिष्ठति ॥ मेधावी तेजस्वी वर्चस्वी यशस्वी ब्रह्मवर्चसी आयुष्मान् भूयासम् ॥ स्वस्ति ॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव

वैश्वदेव.
॥ २८ ॥

तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ ॥ बलिहरणेन यक्ष्ये ॥ तत्र भूमिं प्रोक्ष्य ॥ ॐ धर्मायस्वाहा ॥ अधर्मायस्वाहा ॥ परिषिच्य ॥ अद्भ्यः स्वाहा ॥ परिषिच्य ॥ ओषधिवनस्पतिभ्यःस्वाहा ॥ रक्षोदेवजनेभ्यः स्वाहा ॥ परिषिच्य ॥ गृह्याभ्यःस्वाहा ॥ अवसानेभ्यःस्वाहा ॥ अवसानपतिभ्यः स्वाहा ॥ सर्वभूतेभ्यःस्वाहा ॥ परिषिच्य ॥ कामायस्वाहा ॥ परिषिच्य ॥ अंतरिक्षायस्वाहा ॥ परिषिच्य ॥ यदेजतिजगतियच्चचेष्टतिनाम्नो भागोयन्नाम्नेस्वाहा ॥ परिषिच्य ॥ ॐ पृथिव्यैस्वाहा ॥ अंतरिक्षाय स्वाहा ॥ दिवेस्वाहा ॥ सूर्यायस्वाहा ॥ चंद्रमसेस्वाहा ॥ नक्षत्रेभ्यः स्वाहा ॥ इंद्रायस्वाहा ॥ बृहस्पतयेस्वाहा ॥ प्रजापतयेस्वाहा ॥ ब्रह्मणेस्वाहा ॥ परिषिच्य ॥ प्राचीनावीती ॥ स्वधापितृभ्यःस्वाहा ॥ परिषिच्य ॥ यज्ञोपवीती ॥ अप उपस्पृश्य ॥ नमोरुद्रायपशुपतये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा ॥ परिषिच्य ॥ देवेभ्यःस्वाहा ॥ अग्नौ आहुतिं हुत्वा ॥ अग्नौ परिषिच्य ॥ अपसव्यं ॥ पितृभ्यःस्वधास्तु ॥ परिषिच्य ॥ सव्यं ॥ भूतेभ्योनमः ॥ परिषिच्य ॥ मनुष्ययज्ञेन यक्ष्ये ॥ मनुष्येभ्योहंतं ॥ परिषिच्य ॥ प्रजापतयेस्वाहा ॥ परिषिच्य ॥ परमेष्ठिनेस्वाहा ॥ परिषिच्य ॥ यथाकूपः शतधारःसहस्रधारोअक्षितः ॥ एवामेअस्तु धान्यꣳसहस्रधारमक्षितं ॥ धनधान्येस्वाहा ॥ परिषिच्य ॥ अनेन सायंप्रातर्वैश्वदेवहोमाख्येन कर्मणा भगवान्परमेश्वरः प्रीयतां न मम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ अग्नये नमः गंधाक्षतपुष्पं समर्पयामि ॥ येभूताः प्रचरंतिदिवानक्तंबलिमिच्छंतोवितुर्दस्यप्रेष्याः ॥ तेभ्योबलिंपुष्टिकामो-हरामिमयिपुष्टिंपुष्टिपतिर्ददातुस्वाहा ॥ चांडालवायसेभ्यो भूतेभ्य इदं न मम ॥ हस्तौ पादौ प्रक्षाल्य ॥ आचम्य ॥ प्राणायामं कुर्यात् ॥

वैश्वदेव.

॥ २९ ॥

अथ बलिहरणम् ॥

			२५ देवेभ्यः			
३१ यथा०	९ सर्वभू०	१२ यदेज०	५ रक्षोदे०	२२ ब्रह्म०	२७ भूते०	२६ पितृ०
३० परमे०	८ अवसा०	११ अंतरि०	४ ओषधि०	२१ प्रजा०	२४ नमो०	२३ स्वधा०
२९ प्रजाप०	७ अवसा०	१० कामा०	३ अन्न०	२० बृह०		
२८ मनुष्ये०	६ गृह्या०	२ अधर्मा०	१ धर्मा०	१९ इंद्रा०		
				१८ नक्षत्रे०		
				१७ चंद्र०		
				१६ सूर्या०		
				१५ दिवे०		
				१४ अंतरि०		
				१३ पृथि०		

१ इयं २५तमाहुतिः कुण्डे प्रक्षेप्या.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ यज्ञोपवीतमंत्रः ॥

श्रीगणेशाय नमः ॥ आचम्य ॥ प्राणायामं कृत्वा ॥ अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतसंस्कारमहं करिष्ये ॥ आपोहिष्ठामयोभु० जातवेदामोर्जयैत्या पुनातु ॥ ॐ भूरग्निंचपृथिवींचमांच ॥ त्री९श्चलोकान्त्सँवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ भुवोवायुंचांतरिक्षंचमांच ॥ त्री९श्चलोकान्त्सँवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ स्वरादित्यंचदिवंचमांच ॥ त्री९श्च० ॥ प्रजाप० ॥ तया० ॥ भूर्भुवःसुवश्चंद्रमसंचदिशश्चमांच ॥ त्री९श्च० ॥ प्रजाप० ॥ तया० ॥ ॐकारं प्रथमतंतौ न्यसामि ॥ अग्निं द्वितीय-

तंतौ न्यसामि ॥ नागांस्तृतीयतं० ॥ सोमं चतुर्थतं० ॥ पितॄन्पंचमतं० ॥ प्रजापतिं षष्ठतं० ॥ वायुं सप्तमतं० ॥ सूर्यमष्टमतं० ॥ विश्वान्देवान् नवमतं० ॥ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्य मगन्मज्योतिरुत्तमं ॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्ष९सूर्यआत्माजगतस्तस्थुषश्च ॥ त्रिस्ताडयेत् ॥ अद्य पूर्वोच्चरितवर्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतधारणमहं करिष्ये ॥ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥ अनेन मंत्रेण धारयेत् ॥ दशगायत्रीर्जपित्वा ॥ जीर्णं विसृजेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ रुद्राध्यायः ॥

हरिः ॐ ॥ इडा॑देव॒हूर्मनु॑यज्ञ॒नीबृह॒स्पति॑रुक्थाम॒दानि॑शं ँसिष॒द्विश्वे॑दे॒वाः सू॑क्त॒वाचः॒ पृथि॑विमात॒र्मामा॑हि ँसी॒र्मधु॑मनिष्ये॒मधु॑जनिष्ये॒मधु॑वक्ष्यामि॒ मधु॑वदिष्यामि॒ मधु॑मतींदे॒वेभ्यो॒वाच॑मुद्यास ँशुश्रू॒षेण्यां॑मनु॒ष्ये॑भ्य॒स्तंमा॑ दे॒वाअ॑वंतुशो॒भायै॑पि॒तरोनु॑मदंतु ॥ ॐ शांति॒ः शांति॒ः शांतिः ॥ ॐ नम॑स्ते रुद्रम॒न्यव॑उ॒तोत॒इष॑वे॒नमः॑ ॥ नम॑स्तेअस्तु॒धन्व॑नेबा॒हुभ्या॑मु॒तते॒नमः॑ । यात॒इषुः॑शि॒वत॑माशि॒वंब॒भूव॑ते॒धनुः॑ । शि॒वाश॑र॒व्या॑यातव॒तया॑नोरुद्र मृडय । याते॑रुद्रशि॒वात॒नूरघो॒रापा॑पकाशिनी । तया॑नस्त॒नुवा॒शंत॑मया॒ गिरि॑शंता॒भिचा॑कशीहि । यामिषुं॑गिरिशंत॒हस्ते॒बिभ॒र्ष्यस्त॑वे । शि॒वांगि रित्र॒तांकु॑रु॒माहि ँसी॒ः पुरु॑षं॒जग॑त् । शि॒वेन॒वच॑सात्वा॒गिरि॒शाच्छा॑व दामसि । यथा॑नः॒सर्व॒मिज्जग॑दय॒क्ष्म ँसु॒मना॒अस॑त् । अध्य॑वोचदधिव॒क्ता

प्र॑थ॒मोदैव्यो॑भि॒षकू । अही ँश्च॒सर्वा॑न्जं॒भय॒न्त्सर्वा॑श्चयातुधा॒न्यः । अ॒सौय स्ता॒म्रोअ॑रु॒णउ॒तब॒भ्रुः सु॑मं॒गलः॑ । येचे॒मा ँरु॒द्राअ॒भितो॑दि॒क्षुश्रि॒ताः स॑हस्र॒ शोवै॑षा ँहेड॑ईमहे । अ॒सौयो॑व॒सर्प॑ति॒नील॑ग्रीवो॒विलो॑हितः । उ॒तैनं॑गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑ । उ॒तैनं॒विश्वा॑भू॒तानि॒सदृ॒ष्टोमृ॑डयातिनः । नमो॑ अस्तु॒नील॑ग्रीवायस॒हस्रा॒क्षाय॑मी॒ढुषे॑ । अथो॒येअ॑स्य॒सत्वा॑नो॒हंतेभ्यो॑करं॒ नमः॑ । प्रमुं॑च॒धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्यां । याश्च॑ते॒हस्त॒इष॑वः॒परा॒ताभ॑गवो वप । अ॒व॒तत्य॒धनु॒स्त्व ँसह॑स्राक्ष॒शते॑षुधे । नि॒शीर्य॑श॒ल्यानां॒मुखा॑शि॒वोनः॑ सु॒मना॑भव । विज्यं॒धनुः॑कप॒र्दिनो॒विश॑ल्यो॒बाण॑वा ँउ॒त । अने॑शन्न॒स्येष॑व आ॒भुर॑स्यनिषं॒गथिः॑ । याते॑हे॒तिर्मी॑ढुष्टम॒हस्ते॑ब॒भूव॑ते॒धनुः॑ । तया॒स्मान्वि॒श्व त॒स्त्वम॑य॒क्ष्मया॒परि॑ब्भुज । नम॑स्तेअ॒स्त्वायु॑धा॒याना॑ततायधृ॒ष्णवे॑ । उ॒भा भ्या॑मु॒तते॒नमो॑बा॒हुभ्यां॒तव॒धन्व॑ने । परि॑ते॒धन्व॑नोहे॒तिर॒स्मान्वृ॑णक्तुवि॒श्वतः॑

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथो॒यइ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒तं ॥ १ ॥ नमो॒हिर॑ण्यबाहवेसेना॒न्ये॑
दि॒शांच॒पत॑ये॒नमो॒नमो॑वृ॒क्षेभ्यो॒हरि॑केशेभ्यःपशू॒नांपत॑ये॒नमो॒नमः॑स॒स्पिंज॑
राय॒त्विषी॑मतेपथी॒नांपत॑ये॒नमो॒नमो॑बभ्लु॒शाय॑विव्या॒धिनेन्ना॑ना॒ंपत॑ये॒नमो॒
नमो॒हरि॑केशायोपवी॒तिने॑पु॒ष्टाना॒ंपत॑ये॒नमो॒नमो॑भ॒वस्य॑हे॒त्यैजग॑ता॒ंपत॑ये॒न
मो॒नमो॑रु॒द्राया॑तता॒विने॒क्षेत्रा॑णा॒ंपत॑ये॒नमो॒नमः॑सूतायाहं॑त्याय॒वना॑ना॒ंपत॑ये॒
नमो॒नमो॒रोहि॑तायस्थ॒पत॑येवृ॒क्षाणा॒ंपत॑ये॒नमो॒नमो॑मं॒त्रिणे॑वाणि॒जाय॒कक्षा॑
णा॒ंपत॑ये॒नमो॒ नमो॑भुवं॒तये॑वारिवस्कृ॒तायौष॑धीना॒ंपत॑ये॒नमो॒नम॑उ॒च्चैर्घो॑षा
याक्रं॒दय॑तेपत्ती॒नांपत॑ये॒नमो॒नमः॑कृत्स्नवी॒ताय॒धाव॑ते॒सत्व॑ना॒ंपत॑ये॒नमः॑॥२॥
नमः॒सह॑मानायनिव्या॒धिन॑ऽआव्या॒धिनी॑ना॒ंपत॑ये॒नमो॒ नमः॑ककु॒भाय॑निषं॒
गिणे॑स्ते॒नाना॒ंपत॑ये॒नमो॒नमो॑निषं॒गिण॑ऽइषुधि॒मते॒तस्क॑राणा॒ंपत॑ये॒नमो॒ न
मो॒वंच॑तेपरि॒वंच॑तेस्तायू॒नांपत॑ये॒नमो॒नमो॑निचे॒रवे॑परिच॒रायार॑ण्याना॒ंपत॑ये॒

नमो॒ नमः॑सृका॒विभ्यो॒जिघाꣳ॑सद्भ्योमुष्ण॒तांपत॑ये॒नमो॒ नमो॑सि॒मद्भ्यो॒नक्तं॒
चर॑द्भ्यःप्रकृं॒ताना॒ंपत॑ये॒नमो॒ नम॑उष्णी॒षिणे॑गिरिच॒राय॑कुलुं॒चाना॒ंपत॑ये॒नमो॒
नम॒इषु॑मद्भ्योधन्वा॒विभ्य॑श्चवो॒नमो॒ नम॑आतन्वा॒नेभ्यः॑प्रति॒दधा॑नेभ्यश्चवो॒
नमो॒नम॑आ॒यच्छ॑द्भ्योविसृ॒जद्भ्य॑श्चवो॒नमो॒नमोऽस्य॑द्भ्यो॒विध्य॑द्भ्यश्चवो॒नमो॒
नम॒आसी॑नेभ्यः॒शया॑नेभ्यश्चवो॒नमो॒नमः॑स्व॒पद्भ्यो॒जाग्र॑द्भ्यश्चवो॒नमो॒नम॒
स्तिष्ठ॑द्भ्यो॒धाव॑द्भ्यश्चवो॒नमो॒नमः॑स॒भाभ्यः॑स॒भाप॑तिभ्यश्चवो॒नमो॒ नमो॒अश्वे॒
भ्योश्व॑पतिभ्यश्चवो॒नमः॑ ॥ ३ ॥ नम॑आव्या॒धिनी॑भ्योवि॒विध्यं॑तीभ्यश्चवो॒
नमो॒नम॒उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्चवो॒नमो॒ नमो॑गृ॒त्सेभ्यो॑गृ॒त्सप॑तिभ्यश्च
वो॒नमो॒नमो॒व्राते॑भ्यो॒व्रात॑पतिभ्यश्चवो॒नमो॒ नमो॑ग॒णेभ्यो॑ग॒णप॑तिभ्यश्चवो॒
नमो॒नमो॒विरू॑पेभ्योवि॒श्वरू॑पेभ्यश्चवो॒नमो॒ नमो॑म॒हद्भ्यः॑क्षुल्ल॒केभ्य॑श्चवो॒न
मो॒नमो॑र॒थिभ्यो॑र॒थेभ्य॑श्चवो॒नमो॒नमो॒रथे॑भ्यो॒रथ॑पतिभ्यश्चवो॒नमो॒ नमः॒से

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभ्यःसेनानिभ्यश्चवोनमो नमःक्षत्तृभ्यःसंगृहीतृभ्यश्चवोनमोनमस्तक्षभ्योरथकारेभ्यश्चवोनमो नमःकुलालेभ्यःकर्मारेभ्यश्चवोनमो नमःपुंजिष्टेभ्योनिषादेभ्यश्चवोनमोनमइषुकृद्भ्योधन्वकृद्भ्यश्चवोनमोनमोमृगयुभ्यःश्वनिभ्यश्चवोनमो नमःश्वभ्यःश्वपतिभ्यश्चवोनमः॥ ४ ॥ नमोभवायचरुद्रायचनमःशर्वायचपशुपतयेच नमोनीलग्रीवायचशितिकंठायचनमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेच नमोगिरिशायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेच नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसंवृध्वनेच नमोअग्रियायचप्रथमायचनमआशवेचाजिरायचनमःशीघ्रियायचशीभ्यायचनमऊर्म्यायचावस्वन्यायचनमःस्रोतस्यायचद्वीप्यायच ॥५॥ नमोज्येष्ठायचकनिष्ठायचनमःपूर्वजायचापरजायचनमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्नियायच नमःसोभ्यायचप्रतिसर्यायचनमोयाम्यायचक्षेम्यायचनमउर्व्यायचखल्यायचनमःश्लोक्यायचावसान्यायचनमोवन्यायचकक्ष्यायचनमःश्रवायचप्रतिश्रवायचनमआशुषेणायचाशुरथायचनमःशूरायचावभिंदतेचनमोवर्मिणेचवरूथिनेच नमोबिल्मिनेचकवचिनेचनमःश्रुतायचश्रुतसेनायच ॥ ६ ॥ नमोदुंदुभ्यायचाहनन्यायचनमोधृष्णवेचप्रमृशायचनमोदूतायचप्रहितायच नमोनिषंगिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेच नमःस्वायुधायचसुधन्वनेचनमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्यायच नमःसूद्यायचसरस्यायचनमोनाद्यायचवैशंतायचनमःकूप्यायचावट्यायचनमोवर्ष्यायचावर्ष्यायचनमोमेघ्यायचविद्युत्यायचनमईध्रियायचातप्यायच नमोवात्यायचरेष्मियायचनमोवास्तव्यायचवास्तुपायच ॥ ७ ॥ नमःसोमायचरुद्रायचनमस्ताम्रायचारुणायच नमःशंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंचपशुपतयेचनमउग्रायंचभीमायंचनमोंअग्रेवधायंचदूरेवधायंच नमो
हंन्त्रेचहनीयसेचनमोंवृक्षेभ्योहरिकेशेभ्योनमंस्तारायनमंःशंभवेंचमयोभ
वेंच नमंःशंकरायंचमयस्करायंचनमंःशिवायंचशिवतरायच नमस्तीर्थ्यों
यचकूल्यायचनमंःपार्यायचावार्यायचनमंःप्रतरणायचोत्तरणायच नमं
आतार्यायचालाद्यायचनमःशष्प्यायचफेन्यायचनमंःसिकत्यायचप्रवा
ह्यायच ॥ ८ ॥ नमंइरिण्यायचप्रपथ्यायचनमंःकिꣳशिलायंचक्षयणायच
नमंःकपर्दिनेचपुलस्तयेंचनमोगोष्ठ्यायचगृह्यायचनमस्तल्प्यायचगेह्या
यच नमंःकाट्यायचगह्वरेष्ठायचनमोंह्रदय्यायचनिवेष्प्यायच नमंःपाꣳ
सव्यायचरजस्यायचनमःशुष्क्यायचहरित्यायच नमोलोप्यायचोलप्या
यचनमंऊर्व्यायचसूर्म्यायचनमंःपर्ण्यायचपर्णशद्यायच नमोपगुरमाणाय
चाभिघ्नतेचनमंआक्खिदतेचप्रक्खिदतेच नमोवःकिरिकेभ्योदेवानाꣳ

हृदयेभ्योनमोविक्षीणकेभ्योनमोविचिन्वत्केभ्यो नमंआनिर्हतेभ्योनमं
आमीवत्केभ्यः ॥ ९ ॥ द्रापेअंधसस्पतेदरिद्रंनीललोहित । एषांपुरुषा
णामेषांपशूनांमाभेर्मारोमोएषांकिंचनाममत् । यातेरुद्रशिवातनूःशिवा
विश्वाहभेषजी ॥ शिवारुद्रस्यभेषजीतयानोमृडजीवसे ॥ इमाꣳरुद्रा
यतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतिं । यथानःशमसद्द्विपदेचतुष्प
देविश्वंपुष्टंग्रामेअस्मिन्ननातुरं । मृडानोरुद्रोतनोमयस्कृधिक्षयद्वीराय
नमंसाविधेमते । यच्छंचयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौ ।
मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं । मानोवधीःपित
रंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषः । मानस्तोकेतनयेमानआयु
षिमानोगोषुमानोअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मं
तोनमंसाविधेमते । आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वीरायसुम्नमस्मेतेअस्तु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छद्विबर्हीः । स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहन्तुमुग्रं । मृडाजरित्रेरुद्रस्तवानोअन्यंतेअस्मन्निवपंतुसेनाः । परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः । अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृडय । मीढुष्टमशिवतमशिवोनःसुमनाभव । परमेवृक्षआयुधंनिधायकृत्तिंवसानआचर पिनाकंबिभ्रदागहि । विकिरिदविलोहितनमस्तेअस्तुभगवः । यास्तेसहस्रꣳहेतयोन्यमस्मन्निवपंतुताः । सहस्राणिसहस्रधाबाहुवोस्तवहेतयः । तासामीशानोभगवःपराचीनामुखाकृधि ॥ १० ॥ सहस्राणिसहस्रशोयेरुद्राअधिभूम्यां । तेषाꣳसहस्रयोजनेवधन्वानितन्मसि । अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि । नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः । नीलग्रीवाःशितिकंठादिवꣳरुद्राउपश्रिताः । येवृक्षेषुसस्पिंजरानीलग्रीवाविलोहिताः । येभूतानामधिपतयोविशिखासःकपर्दिनः । येअन्नेषुविविध्यंतिपात्रेषुपिबतोजनान् । येपथांपथिरक्षयऐलबृदायव्युधः । येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः । यएतावंतश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि । नमोरुद्रेभ्योयेपृथिव्यांयेंतरिक्षेयेदिवियेषामन्नंवातोवर्षमिषवस्तेभ्यो दशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥११॥ ॥ ॐ अग्ना विष्णूसजोषसेमावर्धंतुवांगिरः । द्युम्नैर्वाजेभिरागतं । वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमे स्वरश्चमेश्लोकश्चमेश्रावश्चमेश्रुतिश्चमेज्योतिश्चमेसुवश्चमेप्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमे चित्तंचमआधीतंचमेवाक्चमेमनश्चमेचक्षुश्चमेश्रोत्रंचमेदक्षश्चमेबलंचम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओजश्चमेसहश्चम आयुश्चमेजराचमआत्माचमेतनूश्चमेशर्मचमेवर्म
चमेंगानिचमेस्थानिंचमेपरूꣳषिचमेशरीराणिचमे ॥ १ ॥ ज्यैष्ठ्यं
चमआधिपत्यंचमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमे जेमाचमेमहिमा
चमेवरिमाचमेप्रथिमाचमे वर्ष्माचमेद्राघुयाचमे वृद्धंचमेवृद्धिश्चमे
सत्यंचमेश्रद्धाचमेजगच्चमेधनंचमेवशश्चमेत्विषिश्चमे क्रीडाचमेमोदश्च
मेजातंचमेजनिष्यमाणंचमेसूक्तंचसुकृतंचमे वित्तंचमेवेद्यंचमेभूतंचमे
भविष्यच्चमेसुगंचमेसुपथंचमऋद्धंचमऋद्धिश्चमेक्लृप्तंचमेक्लृप्तिश्चमेम
तिश्चसुमतिश्चमे ॥ २ ॥ शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्च
मेसौमनसश्चमेभद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चम भगश्चमेद्रविणंचमे
यंताचमेधर्ताचमेक्षेमश्चमे धृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंच
मेसूश्चमेप्रसूश्चमे सीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेनामयच्च

मेजीवातुश्चमेदीर्घायुत्वंचमेऽनमित्रंचमेभयंचमे सुगंचमेशयनंचमेसू
षाचमेसुदिनंचमे ॥ ३ ॥ ऊर्कमेसूनृताचमेपयश्चमेरसश्चमेघृतंचमे
मधुचमेसग्धिश्चमेसपीतिश्चमे कृषिश्चमेवृष्टिश्चमेजैत्रंचमऔद्भिद्यंचमे
रयिश्चमेरायश्चमेपुष्टंचमेपुष्टिश्चमेविभुचमेप्रभुचमेबहुचमे भूयश्चमेपूर्ण
चमेपूर्णतरंचमेक्षितिश्चमेकूयवाश्चमेन्नंचमेक्षुचमे व्रीहयश्चमेयवाश्चम
माषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेगोधूमाश्चमेमसुराश्चमे प्रियं
गवश्चमेऽणवश्चमेश्यामाकाश्चमेनीवाराश्चमे ॥ ४ ॥ अश्माचमेमृत्तिका
चमेगिरयश्चमेपर्वताश्चमेसिकताश्चमे वनस्पतयश्चमेहिरण्यंचमेयश्चमे
सीसंचमेत्रपुश्चमेश्यामंचमेलोहंचमेग्निश्चमआपश्चमे वीरुधश्चमओष
धयश्चमेकृष्टपच्यंचमेकृष्टपच्यंचमे ग्राम्याश्चमेपशवआरण्याश्चयज्ञेन
कल्पंतांवित्तंचमेवित्तिश्चमेभूतंचमेभूतिश्चमे वसुचमेवसतिश्चमेकर्मच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेशक्तिश्चमेधृतिश्चमेस्मृतिश्चमेगतिश्चमे ॥ ५ ॥ अग्निश्चमइंद्रश्च
मेसोमश्चमइंद्रश्चमेसवि॒ताचमइंद्रश्चमे सर॑स्वतीचमइंद्रश्चमेपूषाचम
इंद्र॑श्चमेबृहस्पतिश्चमइंद्रश्चमे मि॒त्रश्च॑मइंद्रश्चमेवरुणश्चमइंद्रश्चमेत्वष्टा
चमइंद्रश्चमेधा॒ताचमइंद्रश्चमेविष्णुश्चमइंद्रश्चमेऽश्विनौचमइंद्रश्चमे म॒रु
त॑श्चमइंद्रश्चमे॒विश्वे॑चमेदे॒वाइंद्रश्चमे पृथि॒वीचमइंद्रश्चमें॒ऽतरि॑क्षंचमइंद्र
श्चमे॒द्यौश्च॑मइंद्रश्चमेदिश॑श्चमइंद्रश्चमे मू॒र्धाचमइंद्रश्चमेप्र॒जाप॑तिश्चम
इंद्रश्चमे ॥ ६ ॥ अ॒ꣳशुश्चमे॒र॒श्मिश्च॒मेदा॑भ्यश्च॒मेधि॑पतिश्चमउपा॒ꣳशुश्च
मेंतर्या॑मश्चम ऐंद्रवाय॒वश्च॑मेमैत्रावरु॒णश्च॑मआश्वि॒नश्च॑मेप्रतिप्र॒स्थान
श्चमे शु॒क्रश्च॑मेमं॒थीच॑मआग्रय॒णश्च॑मेवैश्वदे॒वश्चमे ध्रु॒वश्च॑मेवैश्वान॒रश्चम
ऋतुग्र॒हाश्च॑मेऽतिग्रा॒ह्या॑श्चमऐंद्रा॒ग्नश्च॑मेवैश्वदे॒वश्चमे मरुत्व॒तीया॑श्चमेमा
हेंद्र॑श्चमआदि॒त्यश्च॑मेसावि॒त्रश्च॑मे सारस्व॒तश्च॑मेपौ॒ष्णश्च॑मेपात्नीव॒तश्च

मेहारियोज॒नश्च॑मे ॥ ७ ॥ इ॒ध्मश्च॑मेब॒र्हिश्च॑मे॒वेदि॑श्चमे॒धिष्ण्याश्चमे॒
स्रुच॑श्चमेचम॒साश्च॑मे॒ग्रावा॑णश्चमे॒स्वर॑वश्चम उपर॒वाश्च॑मे॒धिष॑वणेचमेद्रो
णकल॒शश्च॑मेवाय॒व्या॑निचमेपूत॒भृच्च॑मआधव॒नीय॑श्चम॒ आग्नी॑ध्रंचमेह
वि॒र्धानं॑चमे गृ॒हाश्च॑मे॒सद॑श्चमेपुरो॒डाशा॑श्चमेपच॒ताश्च॑मेऽवभृ॒थश्च॑मेस्वगा
कृ॒तश्च॑मे ॥ ८ ॥ अ॒ग्निश्च॑मेघ॒र्मश्च॑मे॒ऽर्कश्च॑मे॒सूर्य॑श्चमेप्रा॒णश्च॑मेऽश्वमे॒धश्च
मेपृथि॒वीच॒मेऽदि॑तिश्चमे॒ दिति॑श्चमे॒द्यौश्च॑मे॒शक्व॑रीर॒ꣳगुल॑यो॒दिश॑श्चमेय॒ज्ञे
न॑कल्पंता॒मृक्च॑मे॒साम॑चमे॒स्तोम॑श्चमे॒यजु॑श्चमे दी॒क्षाच॑मे॒तप॑श्चमक्रतु
श्चमेव्र॒तंच॑मेऽहो॒रात्र॑योर्वृ॒ष्टाबृ॑हद्रथंत॒रेच॑मेय॒ज्ञेन॑कल्पेतां ॥ ९ ॥ गर्भा
श्चमेव॒त्साश्च॑मे॒ऽन्यवि॑श्चमे॒ऽन्यवी॑चमे दित्य॒वाट्च॑मेदित्यौ॒हीच॑मे॒पंचावि
श्चमेपंचा॒वीच॑मेत्रिव॒त्सश्च॑मेत्रिव॒त्साच॑मे तुर्य॒वाट्च॑मेतुर्यौ॒हीच॑मेपष्ठ॒वाच्च॑
मेपष्ठौ॒हीच॑मऽउ॒क्षाच॑मेव॒शाच॑मऽऋष॒भश्च॑मेवे॒हच्च॑मेऽन॒ड्वान्च॑मेधे॒नुश्च॑म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्पतामपानोयज्ञेनकल्पतां व्यानोयज्ञे
नकल्पतांचक्षुर्यज्ञेनकल्पताꣳश्रोत्रंयज्ञेनकल्पतां मनोयज्ञेनकल्पतांवा
ग्यज्ञेनकल्पतामात्मायज्ञेनकल्पतांयज्ञोयज्ञेनकल्पतां ॥ १० ॥ एकाच
मेतिस्रश्चमेपंचचमेसप्तचमेनवचमएकादशचमे त्रयोदशचमेपंचदश
चमेसप्तदशचमेनवदशचमएकविꣳशतिश्चमेत्रयोविꣳशतिश्चमे पंच
विꣳशतिश्चमेसप्तविꣳशतिश्चमे नवविꣳशतिश्चमएकत्रिꣳशच्चमेत्रय
स्त्रिꣳशच्चमेचतस्रश्चमेष्टौचमेद्वादशचमे षोडशचमेविꣳशतिश्चमेचतु
र्विꣳशतिश्चमेष्टाविꣳशतिश्चमे द्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेचत्वारिꣳ
शच्चमेचतुश्चत्वारिꣳशच्चमेऽष्टाचत्वारिꣳशच्चमे वाजश्चप्रसवश्चापिज
श्चक्रतुश्चसुवश्चमूर्धाचव्यश्नियश्चान्त्यायनश्चान्त्यश्चभौवनश्च भुवनश्चा
धिपतिश्च ॥ ११ ॥ इडादेवहूर्मनु० ॥ इति रुद्राध्यायः समाप्तः ॥

रुद्राध्याय

॥ ३८ ॥

॥ अथ देवेमन्त्रप्रारंभः ॥

श्रीगणेशाय नमः ॥ ॥ ॐमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजा
तमग्निं ॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ १ ॥
ममत्तुनःपरिज्मावसर्हाममत्तुवातोअपांवृषण्वान् ॥ शिशीतामिंद्रापर्वतायु
वन्नस्तन्नोविश्वेवरिवस्यंतुदेवाः ॥ २ ॥ सबुध्नादाष्टजनुषाभ्यग्रंबृहस्पति
र्देवतायस्यसम्राट् ॥ बुध्नाद्योअग्रमभ्यर्त्योजसाबृहस्पतिमाविवासंति
देवाः ॥ ३ ॥ वायुस्ताꣳअग्रेप्रमुमोक्तुदेवःप्रजापतिःप्रजयासंविदानः ॥
प्रमुंचमानाभुवनस्यरेतोगातुंधत्तयजमानायदेवाः ॥ ४ ॥ जातवेदोवप
यागच्छदेवान्त्वꣳहिहोताप्रथमोबभूथ ॥ घृतेनत्वंतनुवोवर्धयस्वस्वाहा
कृतꣳहविरदंतुदेवाः ॥ ५ ॥ शतंवर्चिनःसहस्रंचसाकꣳहुथोअप्रत्यसुरस्य
वीरान् ॥ उतमाताममहिषमन्ववेनदमीत्वाजहतिपुत्रदेवाः ॥ ६ ॥ यज्ञेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञमयजंतदेवास्तानिधर्मीणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंते यत्रपूर्वेसाध्याःसंतिदेवाः ॥ ७ ॥ बृहस्पतेसवितर्वोधयैनꣳसꣳशितं चित्संतराꣳसꣳशिशाधि ॥ वर्धयैनंमहतेसौभगायविश्वएनमनुमदंतु देवाः ॥ ८ ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ यआत्मदाबलदायस्यविश्वउपासतेप्रशिषंयस्यदेवाः ॥ ९ ॥ येसहाꣳ सिसहंसासहँतेरजतेअग्नेपृथिवीमखेभ्यः ॥ विश्वेदेवाविश्वेदेवाः ॥१०॥ अपामतिंदुर्मतिंबाधमानारायस्पोषंयज्ञपतिमाभजंतीसुवर्धेहियजमानाय पोषमश्विनाध्वर्यूसादयतामिहत्वा ॥ अग्नेःपुरीषमसिदेवयानीतांत्वा विश्वेअभिगृणंतुदेवाः ॥ ११ ॥ मर्मीणितेवर्मीभिश्छादयामिसोमस्त्वा राजामृतेनाभिवस्तां ॥ उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतु देवाः ॥ १२ ॥ प्रजापतेस्तपसावावृधानःसद्योजातोदधिषेयज्ञमग्ने ॥

स्वाहाकृतेनहविषापुरोगायाहिसाध्याहविरदंतुदेवाः ॥ १३ ॥ तद्ब्रह्मणां ग्रहुत्वं ॥ देवतावाएतायजमानस्यगृहेगृह्यंते ॥ यद्ब्रह्मः ॥ विदुरेनं देवाः ॥ १४ ॥ तदिष्टीनामिष्टित्वं ॥ एष्टयोहवैनाम ॥ ताइष्ट्यइत्या चक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १५ ॥ दशहूतोहवैनामैषः ॥ तंवाएतंदशहूतꣳसंतं ॥ दशहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहि देवाः ॥ १६ ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतꣳसप्तहूतꣳसंतं ॥ सप्तहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १७ ॥ षड्ढूतोहवै नामैषः ॥ तंवाएतꣳषड्ढूतꣳसंतं ॥ षड्ढोतेत्याचक्षतेपरोक्षेण ॥ परोक्ष प्रियाइवहिदेवाः ॥ १८ ॥ पंचहूतोहवैनामैषः ॥ तंवाएतंपंचहूतꣳ संतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षंप्रियाइवहिदेवाः ॥ १९ ॥ चतुर्हूतोहवैनामैषः ॥ तंवाएतंचतुर्हूतꣳसंतं ॥ चतुर्होतेत्याचक्षतेपरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ २० ॥ आशिक्षँतोनशैकिम ॥ मेदं स्वतायजमानाः ॥ स्रुचाज्येनजुह्वतः ॥ अकामावोविश्वेदेवाः ॥ २१ ॥ नहिस्पशमविदन्नन्यमस्मात् ॥ वैश्वानरात्पुरएतारमग्नेः ॥ अथेममंथन मृतममूराः ॥ वैश्वानरंक्षेत्रजित्यायदेवाः ॥ २२ ॥ उपतेगाइवाकरं ॥ बृणीष्वदुहितर्दिवः ॥ रात्रीस्तोमंनजिग्युषीं ॥ देवींवाचमजनयंत देवाः ॥ २३ ॥ सहिवेदयथाहविः ॥ शिवाअस्मभ्यमोषधीः ॥ कृणोतु विश्वचर्षणिः ॥ भद्रांनःश्रेयःसमनैष्टदेवाः ॥ २४ ॥ अयंयज्ञोवर्धतां गोभिरश्वैः ॥ इयंवेदिःस्वपत्यासुवीरा ॥ इदंबर्हिरतिबर्हीँष्यन्या ॥ इमंयज्ञंविश्वेअवंतुदेवाः ॥ २५ ॥ देवंदेवायजागृवि ॥ कामिहैकाःकइमे पतंगाः ॥ मांथालाःकुलिपरिमापतंति ॥ अनावृतैतान्प्रधमंतुदेवाः ॥ २६ ॥ स्तोमेसप्तदशेस्तुतं ॥ वैरूपेणविशौजसा ॥ हविरिंद्रेवयोदधुः ॥

शारदेनर्तुनादेवाः ॥ २७ ॥ एकविँशक्रुभवःस्तुतं ॥ वैराजेनःश्रिया श्रियं ॥ हविरिंद्रेवयोदधुः ॥ हेमंतेनर्तुनादेवाः ॥ २८ ॥ मरुत्स्विणवे स्तुतं ॥ बलेनशाक्करीःसहः ॥ हविरिंद्रेवयोदधुः ॥ शैशिरेणर्तुनादेवाः ॥२९॥ आदित्यान्कामुमर्वसेहुवेम ॥ येभूतानिजनयंतोविचिरव्युः ॥ सीदं तुपुत्राअदितेरुपस्थं ॥ स्तीर्णबर्हिर्हविरद्योयदेवाः ॥ ३० ॥ आवृत्रहणागृ भिर्विप्रः ॥ ब्रह्मणस्पतेत्वमस्ययंता ॥ सूक्तस्यबोधितनयंचजिन्व ॥ विश्वंतद्भद्रंयदवंतिदेवाः ॥ ३१ ॥ नराशँसोमास्पतिर्नोअव्यात् ॥ आयवामस्यसंगथेरयीणां ॥ प्रियादेवस्यसवितुःस्याम ॥ आनोविश्वे अस्क्रागमंतुदेवाः ॥ ३२ ॥ शर्मभिषाचःशमुरातिषाचः ॥ शंनो दिव्याःपार्थिवाःशंनोअप्याः ॥ येसवितुःसत्यसवस्यविश्वे ॥ मित्रस्य व्रतेवरुणस्यदेवाः ॥ ३३ ॥ याश्चवैशंतीरुतप्रासचीर्याः ॥ यासामषाढा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुभक्षयंति ॥ तानआपःशꣳस्योनाभवंतु ॥ तन्नोविश्वेउपशृण्वंतुदेवाः ॥ ३४ ॥ तौदेवेभ्यःकृणुतोदीर्घमायुः ॥ शतꣳसहस्राभेषजानिधत्तः ॥ यज्ञंनोराजावरुणउपयातु ॥ तन्नोविश्वेअभिसंयंतुदेवाः ॥ ३५ ॥ श्रेष्ठोदेवानामुतमानुषाणां ॥ तंब्राह्मणाःसोमपाःसोम्यासः ॥ प्रोष्ठपदा सौअभिरक्षंतिसर्वे ॥ चत्वारएकमभिकर्मदेवाः ॥ ३६ ॥ लोकस्यराजा महतोमहान्हि ॥ सुगंनःपंथामभयंकृणोतु ॥ यस्मिन्नक्षत्रेयमएति राजा ॥ यस्मिन्नेनमभ्यषिंचंतदेवाः ॥ ३७ ॥ यथादेवतमेवप्रसौति ॥ दैव्यंस्यचमानुषस्यंचव्यावृत्यै ॥ त्रिरांह ॥ त्रिषत्याहिदेवाः ॥ ३८ ॥ यएवदेवानांꣳहविष्कृतः ॥ तान्क्लृप्तयति ॥ त्रिर्क्लृप्तयति ॥ त्रिषत्याहि देवाः ॥ ३९ ॥ तद्ब्रह्महणंनात्यच्यवत ॥ अंतर्वेदिनिनयत्यवरुध्यै ॥ उल्मुकेनाभिगृह्णातिश्रृतत्वाय ॥ शृतकामाइवहिदेवाः ॥ ४० ॥

तेषांतद्भागधेयं ॥ तानेवतेनप्रीणाति ॥ वैश्वदेव्यर्चा ॥ एतेहिविश्वे देवाः ॥ ४१ ॥ सद्योजातोव्यमिमीतयज्ञं ॥ अग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुःप्रदिशृतस्यवाचि ॥ स्वाहाकृतꣳहविरदंतुदेवाः ॥ ४२ ॥ आत्मन्वान्त्सोमघृतवान्हिभूत्वा ॥ देवान्गच्छसुवर्विदयजमानायमह्यं ॥ इराभूतिःपृथिव्यैरसोमोत्क्रमीत् ॥ देवाःपितरःपितरोदेवाः ॥ ४३ ॥ यज्ञियायज्ञंविचयंतिशंच ॥ ओषधीरापइहशक्करीश्च ॥ योमाहृदामनसा यच्चवाचा ॥ योब्रह्मणाकर्मणाद्वेष्टिदेवाः ॥ ४४ ॥ विच्छिनाद्मिविधृती भ्याꣳसपत्नान् ॥ जातान्भ्रातृव्यान्येचजनिष्यमाणाः ॥ विशोयंत्रा भ्यांविधमाम्येनान् ॥ अहꣳस्वानामुत्तमोसानिदेवाः ॥ ४५ ॥ उषाश्रतसौनिमुक्त ॥ सर्वेपापꣳसमूहतां ॥ योनःसपत्नोयोरणः ॥ मतौभिदासतिदेवाः ॥ ४६ ॥ अन्नंविराट् ॥ विराजैवान्नाद्यमवरुंधे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रेधाविभज्यदेवताꣳजुहोति ॥ त्र्यावृतोवैदेवाः ॥ ४७ ॥ अस्मिन्नेवतल्लोके कामान्दधाति ॥ तस्मादस्मिँल्लोकेबहवःकामाः ॥ त्रयाणांत्रयाणाꣳस हवपाजुहोति ॥ त्र्यावृतोवैदेवाः ॥ ४८ ॥ राजामहिमा ॥ यद्रूपां महिम्नोभयतःपरियजति ॥ यजमानमेवराज्येनोभयतःपरिगृह्णाति ॥ पुरस्तात्स्वाहाकारावाअन्येदेवाः ॥ ४९ ॥ एतद्वैतद्देवाएतांदेवताꣳ ॥ पशुंभूतमेधायालभंत ॥ यज्ञमेव ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ ५० ॥ तेनमेतप ॥ तेनमेज्वल ॥ तेनमेदीदिहि ॥ यावद्देवाः ॥ ५१ ॥ वासोददाति ॥ तेनायुःप्रतिरते ॥ वेदित्तृतीयेयजेत ॥ त्रिषत्याहि देवाः ॥ ५२ ॥ कृशानुर्विश्वावसुः ॥ मूर्धन्वान्त्सूर्यवर्चाः ॥ कृतिरित्येका दशगँधर्वगणाः ॥ देवाश्चमहादेवाः ॥ ५३ ॥ एवाहिवायो ॥ एवा हींद्र ॥ एवाहिपूषन् ॥ एवाहिदेवाः ॥ ५४ ॥ भुवनंदेवसूवरीः ॥

आदित्यानदितिंदेवीं ॥ योनिंनोर्ध्वमुदीषत ॥ भद्रंकर्णेभिःशृणुयामदेवाः ॥५५॥ उषाश्चतस्मैनिम्रुक्च ॥ सर्वंपापꣳसमूहतां ॥ योनःसपत्नोयोरणः॥ मर्तोभिदासतिदेवाः ॥ ५६ ॥ ऋतस्यपदेकवयोनिपाँति ॥ अंतःप्रविष्टं कर्तारमेतं ॥ अंतश्चंद्रमसिमनसाचरंतं ॥ सहैवसंतंनविजानंतिदेवाः ॥५७॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः॥ तमेवंविद्वानमृतइहभवति॥ नान्यः पंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥५८॥ ॐराजाधिराजाय प्रसह्यसाहिनें ॥ नमोवयंवैश्रवणायकुर्महे ॥ समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥ कुबेरायवैश्रवणाय ॥ महाराजायनमः ॥ ॐ स्वस्ति ॥ साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमा धिपत्यमयंसमंतपर्यायीस्यात्सार्वभौमःसार्वायुषआंतादापरार्धात्पृथिव्यै समुद्रपर्यंतायाएकराळिति ॥ तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुत्तस्यावसन्गृहे ॥ आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति ॥
विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात् ॥ संबाहु
भ्यांनमतिसंपतत्रैर्द्यावापृथिवीजनयन्देवएकः ॥ योवैतांब्रह्मणोवेद ॥
अमृतेनावृतांपुरीं ॥ तस्मैब्रह्मचब्रह्माच ॥ आयुःकीर्तिंप्रजांददुः ॥

इति देवेमन्त्राः समाप्ताः ॥

संपूर्णोऽयं ग्रन्थः ॥

प्रकाशक : श्रीगजाननबक डेपो,भरतनाट्यमंदिरा समोर, पुणे ३०. फोन नं. ४४३३०४

मुद्रक : श. हे. गुर्जर, आयुर्विद्या मुद्रणालय, ९९२ सदाशिव पेठ, पुणे ४११०३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति हिरण्यकेशीयो नित्यविधिः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति हिरण्यकेशीयो नित्यविधिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.08.19 12:28
,TRANSFERRED=2019/08/05 at 12:43:03
,PAGES=51
,TYPE=STD
,NAME=S0001299
,Book Name=M-79-HIRANAYKESHIYO NITYAVIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection